पुष्प—२

त्रिदोषविज्ञानम्

—: श्री 'गुलाबकुंवरबा आयुर्वेद सोसायटी—जामनगर' इत्याख्यया संस्थया प्रकाशितम् : :—

प्रथमावृत्तिः

२०००

न हि ज्ञानावयवेन कृत्स्ने ज्ञेये विज्ञानमुत्पद्यते । च. वि. ७/४

त्रिदोषविज्ञानम्

विकारनामाकुशलो न जिह्वीयात् कदाचन ।
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ॥
स एव कुपितो दोषः समुत्थानविशेषतः ।
स्थानान्तरगतश्चैव विकारान् कुरुते बहून् ॥
तस्माद्विकारप्रकृतीरधिष्ठानान्तराणि च ।
समुत्थानविशेषांश्च बुद्ध्वा कर्म समाचरेत् ॥
च. सू. १८।४४-४६

उत्साहोच्छ्वासनिःश्वासचेष्टा धातुगतिः समा ।
समो मोक्षो गतिमतां वायोः कर्माविकारजम् ॥
दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवम् ।
प्रभा प्रसादो मेधा च पित्तकर्माविकारजम् ॥
स्नेहो बन्धः स्थिरत्वं च गौरवं वृषता बलम् ।
क्षमा धृतिरलोभश्च कफकर्माविकारजम् ॥
च. सू. १८।४९-५१

अध्यात्मलोके वाताद्यैर्लोके वातरवीन्दुभिः ।
पीड्यते धार्यते चैव विकृताविकृतैस्तथा ॥
च. चि. २६।२३२

वायुः पित्तं कफश्चोक्तः शारीरो दोषसंग्रहः ।
मानसः पुनरुद्दिष्टो रजश्च तम एव च ॥
च. सू. १।५७

शरीरदूषणाद्दोषा धातवो देहधारणात् ।
वातपित्तकफा ज्ञेया मलिनीकरणान्मलाः ॥
शा. पू. ५।२४

अवलोकितग्रन्था:

चरकसंहिता—

सूत्र. १,१०,११;१२,१७,१८,२०,२६ शारीर. ७
विमान. ६,८ चिकित्सा. ३,२८

सुश्रुतसंहिता—

सूत्र. १५,२१,२४,३९,४१,४२निदान. १ शारीर. ७

अष्टांगहृदयम्-

सूत्र. १,११,१२,१३,२१ निदान. १,१५ शारीर. ३

अष्टाङ्गसंग्रहः-सूत्र. ११,१२,१९,२०,२२ निदान. १,५,१५,१६
शारीर. ८

शार्ङ्गधरसंहिता—पूर्वखण्ड २,५,७

काश्यपसंहिता—पृष्ठ २८,२३,३१

माधवनिदाने-मधुकोशव्याख्यायां सुदान्तसेनवचनम्

हारीतसंहिता

चरके चक्रदत्तटीकायां वचनानि
" गङ्गाधरटीकायां "

अष्टांगहृदये अरुणदत्तकृतायां सर्वाङ्गसुन्दराख्यायां टीकायां तन्त्रान्तरवचनानि
" हेमाद्रिटीकायां वचनानि

द्रव्यगुणसंग्रहः

अमरकोषः

त्रिदोषविज्ञानस्यानुक्रमणिका

संख्या	विषयः	पृष्ठम्
१.	शारीरदोषसंग्रहः	१
२.	दोषारम्भकाणि महाभूतानि	१
३.	दोषाणां गुणाः	१–२
४.	प्राकृतानां दोषाणां प्राकृतं कर्म	३–४
५.	स्वाः सिराः संचरतां वात-पित्त-कफानां प्राकृतं कर्म	५
६.	वात-पित्त-कफानां प्रत्येकं पञ्चभेदाः	५
७.	सर्वशरीरचराणामपि वात-पित्त-कफानां देहे विशिष्टानि स्थानानि	६
८.	दोषभेदानां स्थानानि	७–८
	(अ) पञ्चविधवातस्थानानि	७
	(आ) पञ्चविधपित्तस्थानानि	८
	(इ) पञ्चविधकफस्थानानि	८
९.	प्रकृतिस्थानां दोषभेदानां कर्माणि	९–११
	(अ) पञ्चविधानां वातानां प्राकृतानि कर्माणि	९–१०
	(आ) ,, पित्तानां ,, ,,	११
	(इ) ,, कफानां ,, ,,	११
१०.	दोषप्रकोपणानि	१२–१५
	(अ) वातप्रकोपणानि	१२–१३
	(आ) पित्तप्रकोपणानि	१४
	(इ) कफप्रकोपणानि	१५
११.	प्राणादिपञ्चविधवातानां प्रकोपहेतवः	१६
१२.	वातपित्तकफकरा रसाः	१७
१३.	,, विपाकाः	१७
१४.	वातपित्तकफप्रकोपकाः कालाः	१७
१५.	रसादिधात्वाश्रितेषु दोषेषु जायमाना विकाराः	१८–२४
	(अ) रसादिधात्वाश्रिते वाते लिङ्गानि	१८–२२
	(आ) ,, पित्ते ,,	२३
	(इ) ,, कफे ,,	२४
१६.	पित्ताद्यावृतवातलक्षणानि	२५
१७.	पित्तावृतेषु प्राणादिषु लिङ्गानि	२६
१८.	कफावृतेषु ,, ,,	२७
१९.	पञ्चविधवातानामन्योन्यावरणे लिङ्गानि	२८–२९
	(अ) अपानेन सश्लेष्मावृते वाते लिङ्गानि	२८
२०.	वातपित्तकफप्रकृतीनां लक्षणानि	३०–३६
	(अ) वातप्रकृतिः	३०–३१
	(आ) पित्तप्रकृतिः	३२–३३
	(इ) श्लेष्मप्रकृतिः	३४–३६
२१.	प्रकुपितवातकर्माणि	३७
२२.	प्रकुपितपित्तकर्माणि	३८
२३.	प्रकुपितश्लेष्मकर्माणि	३८
२४.	वातपित्तकफानां वृद्धिहेतुः	३९
२५.	,, सामान्यवृद्धिलक्षणम्	३९
२६.	,, विशिष्टानि वृद्धि-लक्षणानि	३९–४०
२७.	,, विशिष्टानि क्षयलक्षणानि	४१
२८.	दोषाणां विविधा गतिप्रकाराः	४२
२९.	रोगानारभमाणानां वातपित्तकफानां पञ्चावस्थाः	४३
३०.	सञ्चयावस्थायां दोषाणां लिङ्गानि	४३
३१.	प्रकोपावस्थायां ,, ,,	४३
३२.	प्रसरावस्थायां दोषलिङ्गानि	४४
३३.	दोषाणां स्थानविशेषसंश्रये जायमाना विकाराः	४४–४५
३४.	प्राणादिपञ्चविधवातप्रकोपजा व्याधयः	४६
३५.	दोषाणां समहीनवृद्धिकृतविकल्पलक्षणानि	४७–४८
३६.	वातनानात्मजा रोगाः	४९–५०
३७.	पित्तनानात्मजा विकाराः	५१–५२
३८.	कफनानात्मजा ,,	५३
३९.	रक्तजा रोगाः	५४
४०.	वातपित्तकफानामवजयनानि	५५–५८
	(अ) वातपित्तकफघ्ना रसाः	५५
	(आ) ,, विपाकाः	५५
	(इ) वातपित्तकफघ्नानि वीर्याणि	५५
	(ई) वातवजयनानि	५६
	(उ) पित्तावजयनानि	५७
	(ऊ) श्लेष्मावजयनानि	५८
४१.	दोषशमनानि	५९–६०
	(अ) वातशमनानि	५९
	(आ) पित्तशमनानि	६०
	(इ) कफसंशमनानि	६१
४२.	सामदोषाणां सामान्यलक्षणानि	६२
४३.	सामानां वातपित्तकफानां लक्षणानि	६२
४४.	निरामाणां वातपित्तश्लेष्मणां ,,	६३
४५.	कालस्वभावदोषाणां संचय-प्रकोप-प्रशमाः	६४
४६.	वृद्धवाग्भटमतेन दोषाणां चयकोपशमानां लक्षणानि	६५
४७.	वातपित्तकफक्षयाणां सामान्यलक्षणम्	६६

अवलोकितग्रन्थाः

चरकसंहिता—

सूत्र. १,१०,११;१२,१७,१८,२०,२६ शारीर. ७
विमान. ६,८ चिकित्सा. ३,२८

सुश्रुतसंहिता—

सूत्र. १५,२१,२४,३९,४१,४२निदान. १ शारीर. ७

अष्टांगहृदयम्-

सूत्र. १,११,१२,१३,२१ निदान. १,१५ शारीर. ३

अष्टाङ्गसंग्रहः-सूत्र. ११,१२,१९,२०,२२ निदान. १,५,१५,१६
शारीर. ८

शार्ङ्गधरसंहिता—पूर्वखण्ड २,५,७

काश्यपसंहिता—पृष्ठ २८,२३,३१

माधवनिदाने-मधुकोशव्याख्यायां सुदान्तसेनवचनम्

हारीतसंहिता

चरके चक्रदत्तटीकायां वचनानि

" गङ्गाधरटीकायां "

अष्टांगहृदये अरुणदत्तकृतायां सर्वाङ्गसुन्दराख्यायां टीकायां तन्त्रान्तरवचनानि

" हेमाद्रिटीकायां वचनानि

द्रव्यगुणसंग्रहः

अमरकोषः

त्रिदोषविज्ञानस्यानुक्रमणिका

संख्या	विषयः	पृष्ठम्
१.	शारीरदोषसंग्रहः	१
२.	दोषारम्भकाणि महाभूतानि	१
३.	दोषाणां गुणाः	१–२
४.	प्राकृतानां दोषाणां प्राकृतं कर्म	३–४
५.	स्वाः सिराः संचरतां वात-पित्त-कफानां प्राकृतं कर्म	५
६.	वात-पित्त-कफानां प्रत्येकं पञ्चभेदाः	५
७.	सर्वशरीरचराणामपि वात-पित्त-कफानां देहे विशिष्टानि स्थानानि	६
८.	दोषभेदानां स्थानानि	७–८
	(अ) पञ्चविधवातस्थानानि	७
	(आ) पञ्चविधपित्तस्थानानि	८
	(इ) पञ्चविधकफस्थानानि	८
९.	प्रकृतिस्थानां दोषभेदानां कर्माणि	९–११
	(अ) पञ्चविधानां वातानां प्राकृतानि कर्माणि	९–१०
	(आ) ,, पित्तानां ,, ,,	११
	(इ) ,, कफानां ,, ,,	११
१०.	दोषप्रकोपणानि	१२–१५
	(अ) वातप्रकोपणानि	१२–१३
	(आ) पित्तप्रकोपणानि	१४
	(इ) कफप्रकोपणानि	१५
११.	प्राणादिपञ्चविधवातानां प्रकोपहेतवः	१६
१२.	वातपित्तकफकरा रसाः	१७
१३.	,, विपाकाः	१७
१४.	वातपित्तकफप्रकोपकाः कालाः	१७
१५.	रसादिधात्वाश्रितेषु दोषेषु जायमाना विकाराः	१८–२४
	(अ) रसादिधात्वाश्रिते वाते लिङ्गानि	१८–२२
	(आ) ,, पित्ते ,,	२३
	(इ) ,, कफे ,,	२४
१६.	पित्ताद्यावृतवातलक्षणानि	२५
१७.	पित्तावृतेषु प्राणाद्येषु लिङ्गानि	२६
१८.	कफावृत्तेषु ,, ,,	२७
१९.	पञ्चविधवातानामन्योन्यावरणे लिङ्गानि	२८–२९
	(अ) अन्नेन सश्लेष्मावृते वाते लिङ्गानि	२८
२०.	वातपित्तकफप्रकृतीनां लक्षणानि	३०–३६
	(अ) वातप्रकृतिः	३०–३१
	(आ) पित्तप्रकृतिः	३२–३३
	(इ) श्लेष्मप्रकृतिः	३४–३६
२१.	प्रकुपितवातकर्माणि	३७
२२.	प्रकुपितपित्तकर्माणि	३८
२३.	प्रकुपितश्लेष्मकर्माणि	३८
२४.	वातपित्तकफानां वृद्धिहेतुः	३९
२५.	,, सामान्यवृद्धिलक्षणम्	३९
२६.	,, विशिष्टानि वृद्धि-लक्षणानि	३९–४०
२७.	,, विशिष्टानि क्षयलक्षणानि	४१
२८.	दोषाणां विविधा गतिप्रकाराः	४२
२९.	रोगानारभमाणानां वातपित्तकफानां पञ्चावस्थाः	४३
३०.	सञ्चयावस्थायां दोषाणां लिङ्गानि	४३
३१.	प्रकोपावस्थायां ,, ,,	४३
३२.	प्रसरावस्थायां दोषलिङ्गानि	४४
३३.	दोषाणां स्थानविशेषसंश्रये जायमाना विकाराः	४४–४५
३४.	प्राणादिपञ्चविधवातप्रकोपजा व्याधयः	४६
३५.	दोषाणां समहीनवृद्धिकृतविकल्पलक्षणानि	४७–४८
३६.	वातनानात्मजा रोगाः	४९–५०
३७.	पित्तजानात्मजा विकाराः	५१–५२
३८.	कफनानात्मजा ,,	५३
३९.	रक्तजा रोगाः	५४
४०.	वातपित्तकफानामवजयनानि	५५–५८
	(अ) वातपित्तकफघ्ना रसाः	५५
	(आ) ,, विपाकाः	५५
	(इ) वातपित्तकफघ्नानि वीर्याणि	५५
	(ई) वातावजयनानि	५६
	(उ) पित्तावजयनानि	५७
	(ऊ) श्लेष्मावजयनानि	५८
४१.	दोषशमनानि	५९–६०
	(अ) वातशमनानि	५९
	(आ) पित्तशमनानि	६०
	(इ) कफशमनानि	६१
४२.	सामदोषाणां सामान्यलक्षणानि	६२
४३.	सामानां वातपित्तकफानां लक्षणानि	६२
४४.	निरामाणां वातपित्तश्लेष्मणां ,,	६३
४५.	कालस्वभावदोषाणां संचय-प्रकोप-प्रशमाः	६४
४६.	वृद्धवाग्भटमतेन दोषाणां चयकोपशमानां लक्षणानि	६५
४७.	वातपित्तकफक्षयाणां सामान्यलक्षणम्	६६

त्रिदोषविज्ञानम्

---

१ "वायुः पित्तं कफश्चोक्तः शारीरो दोषसंग्रहः" (च. सू. १)। "वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः" (अ. हृ. सू. १)। "एषां त्रित्वं च समासतः संक्षेपेण। विस्तरतस्तु प्राणादिपाचकाद्यवलम्बकाद्यवान्तरभेदप्रभेदैरानन्त्यम् (हे)।

२ "तत्र वायोरात्मैवात्मा, पित्तमाग्नेयम्, श्लेष्मा सौम्य इति" (सु. सू. ४२)।

३ "वाय्वाकाशधातुभ्यां वायुः, आग्नेयं पित्तम्, अम्भःपृथिवीभ्यां श्लेष्मा।" (अ. सं. सू. २०)। यद्द्रवसरपन्दस्निग्धमृदुपिच्छिलं रसरुधिरवसाकफपित्तमूत्रस्वेदादि तदाप्यं रसो रसनं च। (च. शा. ७)।

४ "रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः"। (च. सू. १)।

५ "सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु।" (च. सू. १)

६ "गुरु-शीत-मृदु-स्निग्ध-मधुर--स्थिर-पिच्छिलाः। श्लेष्मणः ××× गुणाः॥" (च. सू. १)।

वातः	पित्तम्	कफः
८. दारुणः (च. सू. १२)[१]	८. शुक्लारुणरहितवर्णम्	८. शुक्लवर्णः
९. अमूर्तः	९. विस्रगन्धि (पूति) (आमगन्धि) (च. सू. अ. २०)७	९. मृत्स्नः (च. सू. २०)११
१०. अनवस्थितः (च. सू. २०)[२]	१०. नीलम्	१०. श्लक्ष्णः
११. बहुः	११. पीतम् (सु. सू. २१)८	११. सारः
१२. शीघ्रः	१२. लघुः (का. पृ. २९)९	१२. सान्द्रः
१३. परुषः (च. वि. ८)३	१३. सत्त्वगुणोत्तरम् (शा. प्र. ५)१० (प्रकाशकत्वात्)	१३. मन्दः
१४. अव्यक्तः		१४. स्तिमितः
१५. व्यक्तकर्मा		१५. अच्छः (च. वि. ८)१२
१६. तिर्यग्गः		१६. लवणः (विदग्धावस्थायाम्) (सु. सू. २१)१३
१७. शब्दवान्		१७. तमोगुणाधिकः (शा. प्र. ५) १४
१८. स्पर्शवान्		
१९. रजोबहुलः		
२०. अचिन्त्यवीर्यः		
२१. दोषाणां नेता		
२२. रोगसमूहराट्		
२३. आशुकारी		
२४. मुहुश्चारी (सु. नि. १)४		
२५. योगवाही (च. चि. ३)५		
२६. असंघातः (च. सू. १२)६		

---

१ "रूक्षलघुशीतदारुणखरविशदाः षडिमे वातगुणा भवन्ति।" (च. सू. १२)।

२ "रौक्ष्यं शैत्यं लाघवं वैशद्यं गतिः अमूर्तत्वं अनवस्थितत्वं चेति वायोरात्मरूपाणि।" (च. सू. २०)।

३ "वातस्तु रूक्ष-लघु-चल-बहु-शीघ्र-शीत-परुष-विशदः।" (च. वि. ८)।

४ "अव्यक्तो व्यक्तकर्मा च रूक्षः शीतो लघुः खरः। तिर्यग्गो द्विगुणश्चैव रजोबहुल एव च। अचिन्त्यवीर्यो दोषाणां नेता रोगसमूहराट्॥ आशुकारी मुहुश्चारी" (सु. नि. १)।

५ 'योगवाहः परं वायुः संयोगादुभयार्थकृत्। दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात्।" (च. चि. ३)।

६ कथं चैनमसंघातम्" (च. सू. १२)।

७ "औष्ण्यं, तैक्ष्ण्यं, द्रवत्वं, अनतिस्नेहः, वर्णश्च शुक्लारुणवर्जः, गन्धश्च विस्रः, रसौ च कटुकाम्लौ सरत्वं च पित्तस्यात्मरूपाणि।" (च. सू. २०)।

८ "पित्तं तीक्ष्णं द्रवं पूति नीलं पीतं तथैव च। उष्णं कटुरसं चैव विदग्धं चाम्लमेव च॥" (सु. सू. २१)।

९ "लाघवं तैक्ष्ण्यमौष्ण्यं च वर्णाः शुक्लारुणादृते। वैगन्ध्यं कटुकाम्लत्वमीषत्स्नेहश्च पित्तजाः॥" (का. पृ. २९)।

१० "पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम्" (शा. प्र. ५)।

११ स्नेह-शैत्य-शौक्ल्य-गौरव-माधुर्य-पैच्छिल्य-मात्स्न्यानि श्लेष्मण आत्मरूपाणि" (च. सू. २०)।

१२ "श्लेष्मा हि स्निग्ध-श्लक्ष्ण-मृदु-मधुर-सार-सान्द्र-मन्द-स्तिमित-गुरु-शीत-विज्जलाच्छः।" (च. वि. ८)।

१३ "श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च। मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः।" (सु. सू. १)।

१४ "कफः स्निग्धो गुरुः श्वेतः पिच्छिलः शीतलस्तथा। तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत्॥ (शा. प्र. ५)।

प्राकृतानां (प्रकृतिस्थानां) दोषाणां प्राकृतं (अविकारजं) कर्म

वायोः	पित्तस्य	श्लेष्मणः
१. उत्साहः	१. दर्शनम्	१. स्नेहः
२. उच्छ्वासः	२. पक्तिः (अन्नादीनां पाचनम्)	२. बन्धः
३. निःश्वासः	३. ऊष्मा	३. स्थिरत्वम्
४. चेष्टा (कायवाङ्मनोव्यापारः)	४. क्षुधा	४. गौरवम्
५. धातूनां (रसादीनां) समा गतिः	५. तृषा	५. वृषता (पुंस्त्वशक्तिः)
६. गतिमतां (बहिर्निःसरतां) मलादीनां समो मोक्षः (सम्यक्प्रवर्तनम्) (च. सू. १८)[1]	६. देहमार्दवम्	६. बलम्
	७. प्रभा	७. क्षमा
*७. (शारीर) तन्त्रयन्त्रधारणम्	८. प्रसादनम् (मनसः)	८. धृतिः (धैर्यम्)
*८. नानाविधचेष्टाप्रवर्तनम्	९. मेधाजननम् (च. सू. १८)[2]	९. अलोभः (अलौल्यम्) (च. सू. १८)[4]
*९. मनोनियमनम्	१०. ऊष्मणो मात्रावत्त्वम्	
*१०. मनःप्रेरणम्	११. प्राकृतवर्णः	१०. दार्ढ्यम्
*११. सर्वेन्द्रियोद्योजनम् (सर्वेन्द्रियप्रेरणम्)	१२. शौर्यम्	११. उपचयः
	१३. हर्षः	१२. उत्साहः
*१२. सर्वेन्द्रियार्थाभिवहनम्	१४. प्रसादः (च. सू. १२)[3]	१३. ज्ञानम्
*१३. सर्वशरीरधातुव्यूहनम्		१४. बुद्धिः (च. सू. १२)[5]
*१४. शरीरसंधानम्		

---

१. "उत्साहोच्छ्वासनिःश्वासचेष्टा धातुगतिः समा। समो मोक्षो गतिमतां वायोः कर्माविकारजम्॥ (च. सू. १८)।

२. "दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवम्। प्रभा प्रसादो मेधा च पित्तकर्माविकारजम्॥' (च. सू. १८)।

३. "पक्तिमपक्तिं, दर्शनमदर्शनं, मात्रामात्रत्वमूष्मणः प्रकृतिविकृतिवर्णौ शौर्यं भयं क्रोधं हर्षं मोहं प्रसादमित्येवमादीनि चापराणि द्वंद्वानीति।' (च. सू. १२)।

४. "स्नेहो बन्धः स्थिरत्वं च गौरवं वृषता बलम्। क्षमा धृतिरलोभश्च कफकर्माविकारजम्॥ (च. सू. १८)।

५. "दार्ढ्यं शैथिल्यमुपचयं कार्श्यमुत्साहमालस्यं वृषतां क्लीबतां ज्ञानमज्ञानं बुद्धिं मोहमेवमादीनि चापराणि द्वन्द्वानीति (च. सू. १२)।

वायोः	पित्तस्य	श्लेष्मणः
*१५. वाक्प्रवर्तनम्	१५. रागः (रञ्जनम्)	१५. सन्धिसंश्लेषः
*१६. हर्षोत्साहजननम्	१६. ओजः	१६. रोपणम्
*१७. अग्निसन्धुक्षणम्	१७. तेजः (सु. सू. १५)[2]	१७. पूरणम् (सु. सू. १५)[5]
*१८. दोषसंशोषणम् (शरीरक्लेदसंशोषणम्)	१८. अभिलाषः (प्रियोपभोगेच्छा. इ.) (अ. सं. सू. १९)[3]	१८. विसर्गः (सु. सू. २१)[6]
*१९. मलक्षेपणम्	१९. रुचिः (अ. हृ. सू. ११)[4]	
*२०. स्थूलाणुस्रोतोभेदनम्	२०. आदानम् (सु. सू. २१)[6]	
*२१. गर्भाकृतिनिर्माणम्		
*२२. आयुषोऽनुवर्तनम् (च.सू. १२)[1]		
२३. विक्षेपः (सु. सू. २१)[6]		
२४. प्रस्पन्दनम्		
२५. उद्वहनम्		
२६. पूरणम्		
२७. विवेकः (सु.सू. १५)[7]		

*१ "वायुस्तन्त्रयन्त्रधरः, ××प्रवर्तकश्चेष्टानामुच्चावचानां, नियन्ता प्रणेता च मनसः, सर्वेन्द्रियाणामुद्योजकः, सर्वेन्द्रियार्थानामभिवोढा, सर्वशरीरधातुव्यूहकरः, संधानकरः शरीरस्य, प्रवर्तको वाचः, ××× हर्षोत्साहयोर्योनिः, समीरणोऽग्नेः, दोषसंशोषण, क्षेप्ता बहिर्मलानां, स्थूलाणुस्रोतसां भेत्ता, कर्ता गर्भाकृतीनां, आयुषोऽनुवृत्तिप्रत्ययभूतो भवत्यकुपितः।" (च. सू. १२)।

२ "रागपक्त्योजस्तेजोमेधोष्मकृत् पित्तं पञ्चधा प्रविभक्तमग्निकर्मणाऽनुग्रहं करोति।" (सु. सू. १५)।

३ "पित्तमूष्माभिलाषक्षुत्पिपासाप्रभाप्रसाददर्शनमेधाशौर्यमार्दवादिभिः पित्तम् (देहमनुगृह्णाति)।" (अ.सं.सू. १९)

४ "पित्तं पक्त्यूष्मदर्शनैः। क्षुत्तृड्रुचिप्रभामेधाधीशौर्यतनुमार्दवैः" (अ. हृ. सू. ११)

५ "सन्धिसंश्लेषण-स्नेहन-रोपण-पूरण-बल-स्थैर्यकृच्छ्लेष्मा पञ्चधा प्रविभक्त उदककर्मणाऽनुग्रहं करोति।" (सु. सू. १५)

६ "विसर्गादानविक्षेपैः सोमसूर्यानिला यथा। धारयन्ति जगद्देहं कफपित्तानिलास्तथा॥" (सु. सू. २१)।

७ "प्रस्पन्दनोद्वहनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति। (सु. सू. १५)।

स्वाः सिराः संचरतां वात-पित्त-कफानां प्राकृतं कर्म

वातकर्म	पित्तकर्म	कफकर्म
१. क्रियाणाम् (कायक्रियाणां प्रसारणाकुञ्चनादीनां, वाक्क्रियाणां भाषितादीनां च) अप्रतीघातः	१. भ्राजिष्णुता	१. अङ्गेषु स्नेहः
२. बुद्धिकर्मणाम् (ज्ञानेन्द्रियाणां मनसो बुद्धेश्च स्वे स्वे विषये) अप्रमोहः (सु. शा. ७) १	२. अन्नरुचिः	२. सन्धिस्थैर्यम्
	३. अग्निदीप्तिः	३. बलम्
	४. अरोगता (सु. शा. ७) २	४. उदीर्णता (सु. शा. ७) ३

वातपित्तकफानां प्रत्येकं पञ्चभेदाः

वातभेदाः	पित्तभेदाः	कफभेदाः
१. प्राणः	१. पाचकम्	१. अवलम्बकः
२. उदानः	२. रञ्जकम्	२. क्लेदकः
३. समानः	३. साधकम्	३. बोधकः
४. व्यानः	४. आलोचकम्	४. तर्पकः
५. अपानः (च. चि. २८) ४ (सु. नि. १) ५	५. भ्राजकम् (अ. सं. सू. २०) ६	५. श्लेषकः (अ. सं. सू. २०) ७

---

१ "क्रियाणामप्रतीघातममोहं बुद्धिकर्मणाम्। करोत्यन्यान्गुणांश्चापि स्वाः सिराः पवनश्चरन्।" (सु. शा. ७)।

२ "भ्राजिष्णुतामन्नरुचिमग्निदीप्तिमरोगताम्। संसर्पत् स्वाः सिराः पित्तं कुर्याच्चान्यान् गुणानपि॥" (सु. शा. ७)

३ "स्नेहमङ्गेषु सन्धीनां स्थैर्यं बलमुदीर्णताम्। करोत्यन्यान् गुणांश्चापि बलासः स्वाः सिराश्चरन्॥" (सु. शा. ७)

४ "प्राणोदानसमानाख्यव्यानापानैः स पञ्चधा (भिन्नः)।" (च. चि. २८)

५ "प्राणोदानौ समानश्च व्यानश्चापान एव च। स्थानस्था मारुताः पञ्च यापयन्ति शरीरिणम्॥" (सु. नि. १)

६ "पाचकरञ्जकसाधकालोचकभ्राजकभेदैः पञ्चधा-(भिद्यते) पित्तम्।" (अ. सं. सू. २०)।

७ "अवलम्बक-क्लेदक-बोधक-तर्पक-श्लेषकभेदैः श्लेष्मा (पञ्चधा भिद्यते)।" (अ. सं. सू. २०)।

१ सर्वशरीरचराणाम्[1] (सर्वशरीरव्यापिनाम्) अपि वातपित्तकफानां देहे विशिष्टानि स्थानानि

वातस्थानानि	पित्तस्थानानि	कफस्थानानि
१. बस्तिः	१. स्वेदः	१. उरः (विशेषेण श्लेष्मस्थानम्)
२. पुरीषाधानम्	२. रसः	२. शिरः
३. कटिः	३. लसीका	३. ग्रीवा
४. सक्थिनी	४. रुधिरम्	४. पर्वाणि
५. पादौ	५. आमाशयः (च. सू. २०)५ (विशेषेण पित्तस्थानम्)	५. आमाशयः (च. सू. २०) ७
६. अस्थीनि	६. यकृत्	६. मेदः
		७. कण्ठः' (सु. सू. २१)८
७. पक्वाशयः (च. सू. २०) २ (विशेषेण वातस्थानम्)	७. प्लीहा	८. जिह्वामूलम्
		९. सन्धयः
८. श्रोत्रम्	८. हृदयम्	१०. क्लोम (अ. सं. सू. २०) ९
९. स्पर्शनम् (अ. सं. सू. २०) ३	९. दृष्टिः	११. रसः
१०. अधोनाभिः	१०. त्वक् (स्पर्शनम्)	१२. घ्राणम्
११. मज्जा (का. पू. २७) ४	११. पक्वामाशयमध्यम् (सु. सू. २१) ६	१३. रसनम्
		१४. बाहुः (का. पू. २७) १०
		१५. हृदयम् (अ. सं. सू. १९) ११

---

१. "सर्वशरीरचरास्तु वातपित्तश्लेष्माणः सर्वस्मिञ्छरीरे कुपिताकुपिताः शुभाशुभानि कुर्वन्ति" (च. सू. २०)।

२. "बस्तिः पुरीषाधानं कटिः सक्थिनी पादावस्थीनि पक्वाशयश्च वातस्थानानि। तत्रापि पक्वाशयो विशेषेण वातस्थानम्।" (च. सू. २०)।

३. "तत्र पक्वाशयः कटिः सक्थिनी पादावस्थि श्रोत्रं स्पर्शनं च वातस्थानानि विशेषेण।" (अ. सं. सू. २०)।

४ "अधोनाभ्यस्थिमज्जानौ वातस्थानं प्रचक्षते। (का. पू. २७)।

५. "स्वेदो रसो लसीका रुधिरमामाशयश्च पित्तस्थानानि। तत्राप्यामाशयो (विशेषेण पित्तस्थानम्)।" (च. सू. २०)

६. "पित्तस्य यकृत्प्लीहानौ हृदयं दृष्टिस्त्वक् पूर्वोक्तं च (पक्वामाशयमध्यस्थं पित्तम्)।" (सु. सू. २१)।

७. "उरः शिरो ग्रीवा पर्वाण्यामाशयो मेदश्च श्लेष्मस्थानानि। तत्राप्युरो विशेषेण श्लेष्मस्थानम्।" (च. सू. २०)।

८. "श्लेष्मण उरः शिरः कण्ठो जिह्वामूलसन्धय इति श्लेष्मस्थानानि पूर्वोक्तं च।" (सु. सू. २१)।

९. "उरः शिरः क्लोम पर्वाण्यामाशयो रसो मेदो घ्राणं रसनं च श्लेष्मस्थानानि।" (अ. सं. सू. २०)।

१०. "मेदः शिर उरो ग्रीवा सन्धिर्बाहुः कफाश्रयः। हृदयं तु विशेषेण श्लेष्मणः स्थानमुच्यते॥" (का. पू. २७)।

११. "तत्राधस्थनि स्थितो वायुः, असृक्स्वेदयोः पित्तम्, शेषेषु श्लेष्मा (अ. सं. सू. १९)।

दोषभेदानां स्थानानि

पञ्चविधवातस्थानानि

प्राणस्थानानि	उदानस्थानानि	समानस्थानानि	व्यानस्थानानि	अपानस्थानानि
१. मूर्धा	१. नाभिः	१. स्वेदवहस्रोतांसि	१. सर्वदेहः (च. चि. २८.) [11]	१. वृषणौ
२. उरः	२. उरः	२. दोषवहस्रोतांसि		२. बस्तिः
				३. मेढ्रम् (स्त्रिया योनिः)
३. कण्ठः	३. कण्ठः (च.चि.२८)[2]	३. अम्बुवहस्रोतांसि	२. हृदयम् (अ. सं. सू. २०) [12]	
४. जिह्वा		४. जठराग्नेः पार्श्वम् (च. चि. २८) [4]		४. नाभिः
५. आस्यम्	४. वक्त्रम् (सु. नि. १)[3]			५. ऊरू
६. नासिका (च.चि. २८)[1]		५. आमाशयः		६. वंक्षणौ
	५. नासिका (अ. सं सू. १९)	६. पक्वाशयः (सु नि. १)[5]		
७. हृदयम् (अमरः)[10]		७. मलवहस्रोतः		७. गुदम्
		८. शुक्रवहस्रोतः		८. अन्त्राणि (च.चि.२८)[7]
		९. आर्तववहस्रोतः (अ.सं.सू. २०)[6]		९. पक्वाशयः (सु. नि. १)[8]
		१०. नाभिः (अमरः) [10]		१०. श्रोणिः (अ.सं.सू. २०.)[9]

---

१ "स्थानं प्राणस्य मूर्धोरःकण्ठजिह्वास्यनासिकाः।" (च. चि. २८)।

२ "उदानस्य पुनः स्थानं नाभ्युरः कण्ठ एव च।" (च. चि. २८)।

३ "उदानः उरस्यवस्थितः कण्ठनासिकानाभिचरः।" (अ. सं. सू. २०)।

४ "स्वेददोषाम्बुवाहीनि स्रोतांसि समधिष्ठितः। अन्तरग्नेश्च पार्श्वस्थः समानः" (च. वि. २८)।

५ आमपक्वाशयचरः समानः" (सु. नि. १)।

६ "समानोऽन्तरग्निसमीपस्थः ××× पक्वामाशय-दोषमलशुक्रार्तवाम्बुवहस्रोतोविचारी।" (अ. सं. सू. २०)।

७ "वृषणौ बस्तिमेढ्रं च नाभ्यूरू वंक्षणौ गुदम्। अपानस्थानमन्त्रस्थः" (च.चि. २८)।

८ "पक्वाधानालयोऽपानः" (सु. नि. १)।

९ "अपानस्त्वपानस्थितो बस्तिश्रोणिमेढ्रवृषण-वंक्षणोरुचरः" (अ. सं. सू. २०।

*१० "हृदि प्राणः गुदेऽपानः समानो नाभिसंश्रितः। उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः" (अमरः)।

११ "देहं व्याप्नोति सर्वं तु व्यानः" (च. चि. २८)

१२ "व्यानो हृद्यवस्थितः कृत्स्नदेहचरः" (अ. सं. सू. २०)।

पञ्चविधपित्तस्थानानि

पाचकस्थानम्	रञ्जकस्थानानि	साधकस्थानम्	आलोचकस्थानम्	भ्राजकस्थानम्
१. पक्वामाशयमध्यम् (सु. सू. २१)१	१. यकृत् २. प्लीहा (सु. सू. २१)२ ३. आमाशयः (अ. सं. सू. २०)३	१. हृदयम् (सु. सू. २१)४	१. दृष्टिः (सु. सू. २१)५	१. त्वक् (सु. सू. २१)६

पञ्चविधकफस्थानानि

अवलम्बकस्थानम्	क्लेदकस्थानम्	बोधकस्थानानि	तर्पकस्थानम्	श्लेषकस्थानम्
१. उरः (अ. हृ. सू. १२)७	१. आमाशयः (अ. हृ. सू. १२)८	१. जिह्वामूलम् २. कण्ठः (सु. सू. २१)९ ३. रसना (अ. सं. सू. २०)१०	१. शिरः (अ. हृ. सू. १२)११	१. सर्वसन्धयः (अ. हृ. सू. २१)१२

---

१ "पक्वामाशयमध्यस्थं पित्तं ××× तस्मिन् पाचकोऽग्निरिति संज्ञा।" (सु. सू. २१)।

२ "यत्तु यकृत्प्लीह्नोः पित्तं तस्मिन् रञ्जकोऽग्निरिति संज्ञा।" (सु. सू. २१)।

३ "आमाशयस्थं तु रसस्य रञ्जनाद्रञ्जकम्।" (अ. सं. सू. २०)।

४ "यत्पित्तं हृदयस्थं तस्मिन् साधकोऽग्निरिति संज्ञा।" (सु. सू. २१)।

५ "यत्तु दृष्ट्यां पित्तम् तस्मिन्नालोचकोऽग्निरिति संज्ञा।" (सु. सू. २१)।

६ "यत्तु त्वचि पित्तं तस्मिन् भ्राजकोऽग्निरिति संज्ञा।" (सु. सू. २१)।

७ "उरःस्थः ××× अवलम्बकः।" (अ. हृ. सू. १२)।

८ "आमाशयसंस्थितः क्लेदकः।" (अ. हृ. सू. १२)।

९ जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वाद्रसज्ञाने वर्तते" (सु. सू. २१)।

१० "बोधको रसनास्थायी" (अ. हृ. सू. १२)।

११ "शिरःसंस्थोऽक्षतर्पणात् (तर्पकः)" (अ. हृ. सू. १२)।

१२ "श्लेषकः सन्धिषु स्थितः।" (अ.हृ.सू.१२)।

प्रकृतिस्थानां दोषभेदानां कर्माणि

पञ्चविधवातानां प्राकृतानि कर्माणि

प्राणकर्माणि	उदानकर्माणि	समानकर्माणि	व्यानकर्माणि	अपानकर्माणि
१ ष्ठीवनम्	१ वाक्प्रवृत्तिः	१ अग्निबलप्रदानम्	१ गतिः	१ शुक्रोत्सर्गः
२ क्षवथुः	(भाषितगीतादिः)	(अग्निसंधुक्षणम्)	२ प्रसारणम्	२ मूत्रोत्सर्गः
३ उद्गारः	२ प्रयत्नः	(च. चि. २८)३	३ आक्षेपः	३ पुरीषोत्सर्गः
४ श्वासः (श्वसनं)	३ ऊर्जा	२ अन्नपाचनम्	४ निमेषः	४ आर्तवोत्सर्गः
(प्रश्वासोच्छ्वासौ)	४ बलम्	३ रसमलादिविवेचनम्	५ उन्मेषः	५ गर्भोत्सर्गः
५ आहरणम्	५ वर्णः	(सु. नि. १)४	(च. चि. २८)६	(च. चि. २८)७
(अन्नप्रवेशनम्)	(च. चि. २८)२	४ स्रोतोवलम्बनम्		
(च.चि. २८)१		५ अन्नधारणम्		
		६ किट्टाधोनयनम्		
		(अ.सं. सू. २०)५		

---

१ "प्राणस्य***ष्ठीवनक्षवथूद्गारश्वासाहारादि कर्म च।" (च.चि. २८)

२ "उदानस्य***वाक्प्रवृत्तिः प्रयत्नोर्जाबलवर्णादि कर्म च।" (च. चि. २८)

३ "समानोऽग्निबलप्रदः।" (च. चि. २८)

४ "**समानः**अन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि।**" (सु. नि. १)

५ "**समानः**तद्बलः बन्नान्नधारणपाचनविवेचन-किट्टाधोनयनादिक्रियः।**" (अ.सं.सू. २०)

६ "व्यानः**गतिप्रसारणाक्षेपनिमेषादिक्रियः सदा" (च. चि. २८)

७ "अपानः शुक्रमूत्रशकृन्ति च। सृजत्यार्तवगर्भौ च" (च. चि. २८)।

पञ्चविधवातानां प्राकृतानि कर्माणि

प्राणकर्माणि	उदानकर्माणि	समानकर्माणि	व्यानकर्माणि	अपानकर्माणि
७ प्राणावलम्बनम्	७ धीः		६ रससंवहनम्	
(सु.नि. १)[1]			७ स्वेदस्रावणम्	
	धृतिः		८ असृक्स्रावणम्	
८ बुद्धिधारणम्			(सु. नि. १)[4]	
९ इन्द्रियधारणम्	९ स्मृतिः			
१० मनोधारणम्	१० मनोविबोधनम्		९ आकुञ्चनम्	
	(अ. सं. सू. २०)[3]		१० उत्क्षेपणम्	
११ धमनीधारणम्			११ अवक्षेपणम्	
(अ.सं.सू. २०)[2]			१२ जृम्भणम्	
			१३ अन्नास्वादनम्	
			१४ स्रोतोविशोधनम्	
			१५ योनौ शुक्रप्रतिपादनम्	
			१६ अन्नस्य किट्टात्सारविभजनम्	
			१७ धातुतर्पणम्	
			(अ. सं. सू. २०)[5]	

---

१ "प्राणो नाम देहधृक् । सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ।" (सु. नि. १) ।

२ प्राणो *** बुद्धीन्द्रियमनोधमनीधारणष्ठीवनक्षवथूद्गारप्रश्वासोच्छ्वासान्नप्रवेशादिक्रियः ।" (अ. सं. सू. २०)

३ "उदानः *** वाक्प्रवृत्तिप्रयत्नोर्जाबलवर्णस्रोतःप्रीणनधीधृतिस्मृतिमनोविबोधनादिक्रियः ।" (अ. सं. सू. २०)

४ "व्यानो रससंवहनोद्यतः । स्वेदासृक्स्रावणश्चापि पञ्चधा चेष्टयति ॥" (सु. नि. १)

५ "व्यानः गतिप्रसारणाकुञ्चनोत्क्षेपावक्षेपनिमेषोन्मेषजृम्भणान्नास्वादनस्रोतोविशोधनस्वेदासृक्स्रावणादिक्रियः । योनौ च शुक्रप्रतिपादनं विभज्य चान्नस्य किट्टात् सारं तेन क्रमशः धातूंस्तर्पयति । (अ. सं. सू. २०) ।

पञ्चविधानां पित्तानां प्राकृतानि कर्माणि

पाचककर्माणि	रञ्जककर्माणि	साधककर्माणि	आलोचककर्माणि	भ्राजककर्माणि
१ अन्नपानपाचनम्	१ रसरञ्जनम्	१ अभिप्रार्थित-मनोरथसाधनम्	१ रूपग्रहणम्	१ अभ्यङ्गपरिषेका-वगाहलेपनादीनां क्रियाणां पाचनम्
२ दोषरसमूत्रपुरीष-विवेकः (सारकिट्टविभजनं)	(सु. सू. २१)२ (अ. सं सू. २०)२अ	(सु. सू. २१)३	(रूपालोचनम्) (सु. सू. २१)५ (अ. सं. सू. २०)अ	
३ शेषाणां पित्तस्थानाना-मग्निकर्मणाऽनुग्रहः (सु.सू. २१)१		२ बुद्धिमेधाभिमानो-त्साहैरभिप्रेतार्थसाध-नम् (अ. सं. सू. २०)४		२ द्रव्याणां छायाप्रका-शनम् (सु.सू. २१)६ (अ. सं. सू. २०) ६ अ

पञ्चविधानां कफानां प्राकृतानि कर्माणि

क्लेदककर्म	अवलम्बककर्म	बोधककर्म	तर्पककर्म	श्लेष्मककर्म
१. अन्नसंघात-क्लेदनम्	१. त्रिकावलम्बनम् २. हृदयावलम्बनम्	१. रसबोधनम् (अ. सं. सू. २०)९	१. इन्द्रियतर्पणम् (सु. सू. २१)१०	१. अस्थिसन्धि-संश्लेषणम्
२. शेषाणां कफस्थानाना-मुदककर्मणा-नुग्रहः (सु. सू. २१)७	(सु. सू. २१)८ ३. शेषाणां कफस्थानाना-मवलम्बनम् (अ. सं सू. २०)८अ.		(अ. सं. सू. २०)११	(सु. सू. २१)१२ (अ. सं. सू. २०)१२

---

१ "(पाचकं) पित्तं चतुर्विधान्नपानं पचति विवेचयति च दोषरसमूत्रपुरीषाणि, तत्रस्थमेव चात्मशक्त्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्मणाऽनुग्रहं करोति ।" (सु सू. २१)।

२ "स(रञ्जकोऽग्निः) रसस्य रागकृदुक्तः" (सु. सू. २१)

२ (अ) "रसस्य रञ्जनात् रञ्जकम्" (अ.सं.सू. २०)

३ "** साधकोऽग्निः ** अभिप्रार्थितमनोरथसाधनकृदुक्तः।" (सु. सू. २१)

४ "हृदिस्थं बुद्धिमेधाभिमानोत्साहैरभिप्रेतार्थसाधनात् साधकम् । (अ. सं. सू. २०)।

५ "स(आलोचकोऽग्निः) रूपग्रहणाधिकृतः। (सु.सू. २१)

५ (अ) "रूपालोचनादालोचकम्। (अ. सं. सू. २०)

६ "सो(भ्राजकः)ऽग्निः अभ्यङ्गपरिषेकावगाहावलेपनादीनां क्रियाद्रव्याणां पक्ता छायानां प्रकाशकः।" (सु.सू. २१)

६ (अ) "तत् (भ्राजकपित्तम्) अभ्यङ्गपरिषेकालेपादीन् पाचयति, छायाश्च प्रकाशयति ।" (अ.सं.सू.२०)

७ 'स तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसंघातः सुखजरो भवति।***स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्मणाऽनुग्रहं करोति।" (सु. सू. २१)

(अ) "अन्नसंघातस्य क्लेदकः।"(अ. सं. सू. २०)

८ त्रिकसंधारणमात्मवीर्येणान्नरससहितेन हृदयावलम्बनं करोति। (सु. सू. २१)

८ (अ) "स्ववीर्येण त्रिकस्यान्नवीर्येण च हृदयस्य शेषाणां च श्लेष्मस्थानानां तत्रस्थ एवोदककर्मणाऽवलम्बनादवलम्बक इत्युच्यते।" (अ. सं. सू. २०)

९ "सम्यग्रसबोधनात् बोधकः।" (अ. सं. सू. २०)।

१० "स्नेहसंतर्पणाधिकृतत्वादिन्द्रियाणामात्मवीर्येणाऽनुग्रहं करोति।" (सु. सू. २१)।

११ "चक्षुरादीन्द्रियतर्पणात्तर्पकः।" (अ. सं. सू. २०)।

सर्वसन्धिसंश्लेषात्सर्वसंध्यनुग्रहं करोति ॥(सु.सू.२१)।

१२ "अस्थिसंधिसंश्लेषात् श्लेषक इति। (अ. सं. सू. २०)।

दोषप्रकोपणानि

वातप्रकोपणानि

१. बलवद्विग्रहः
२. अतिव्यायामः
३. अतिव्यवायः
४. अत्यध्ययनम्
५. प्रपतनम्
६. प्रधावनम्
७. प्रपीडनम्
८. अभिघातः
९. लङ्घनम्
१०. प्लवनम्
११. प्रतरणम्
१२. रात्रिजागरणम्
१३. भारहरणम्
१४. गजातिचर्या
१५. तुरगातिचर्या
१६. रथातिचर्या
१७. पदातिचर्या
१८. कटुको रसः
१९. तिक्तो रसः
२०. कषायो रसः
२१. रूक्षम्
२२. लघु
२३. शीतवीर्यम्
२४. शुष्कशाकम्
२५. वल्लूरम् [शुष्कमांसम्]
२६. वरकः
२७. उद्दालकः
२८. कोरदूषः
२९. श्यामाकः
३०. नीवारः
३१. मुद्गः
३२. मसूरः
३३. आढकी
३४. हरेणुः (चणकः)
३५. कलायः
३६. निष्पावः
३७. अनशनम्
३८. विषमाशनम्
३९. अध्यशनम्
४०. वातवेगविघातः
४१. मूत्रवेगविघातः
४२. पुरीषवेगविघातः
४३. छर्दिवेगविघातः
४४. शुक्रवेगविघातः
४५. क्षवथुवेगविघातः
४६. उद्गारवेगविघातः
४७. बाष्पवेगविघातः
(सु. सू. २१)
४८. विषमोपचारः
४९. दोषातिस्रवणम् (पुरीषस्रवणम्)
५०. रक्तातिस्रवणम्
५१. धातूनां संक्षयः
५२. चिन्ता
५३. शोकः
५४. रोगातिकर्षणम्
५५. दुःखशय्या
५६. दुःखासनम्
५७. क्रोधः
५८. दिवास्वापः
५९. भयम्
६०. आमः
६१. मर्माभिघातः
६२. गजोष्ट्राश्वशीघ्रयानेभ्यः पतनम्
६३. मार्गविचरणञ्च
(च. चि. २८)
६४. विष्टम्भि
६५ विरूढकम्
६६ तृणधान्यम्
६७. करीरम्
६८. तुम्बम्
६९. कालिङ्गकम्
७०. चिर्भटम्
७१. बिसम्
७२. शालूकम्
७३. जाम्बवम्
७४. तिन्दुकम्
७५. हीनभोजनम्
७६. शुष्कभोजनम्
७७. प्रमिताशनम्
७८. तृषिताशनम्
७९. क्षुधिताम्बुपानम्
८०. विरेचनादिकर्मातियोगः
८१. वेगोदीरणम्
८२. निग्रहः
८३. अतिखरचापकर्षणम्
८४. अत्युच्चलङ्घनम्
८५. विषमलङ्घनम्
८६. दम्यगोवाजिगजनिग्रहः
८७. अश्म-शिला-लोह-काष्ठानामुत्क्षेपणम्
८८. विक्षेपणम्
८९. भ्रमणम्
९०. चालनम्
९१. गाढोत्सादनम्
(अ. सं. नि. १)
९२. अत्युच्चभाषणम्
९३. क्रियातियोगः
(अ. हृ. नि. १)
९४. परावातनम्
९५. साहसम्
९६. उत्कण्ठा
९७. ग्रीष्मः
९८. अपररात्रः

१. "अत ऊर्ध्वं प्रकोपणानि वक्ष्यामः। तत्र बलवद्विग्रहातिव्यायामव्यवायाध्ययनप्रपतनप्रधावनप्रपीडनाभिघातलङ्घन-प्लवनप्रतरणरात्रिजागरणभारहरणगजतुरगरथपदातिचर्याकटुकषायतिक्तरूक्षलघुशीतवीर्यशुष्कशाकवल्लूरवरकोद्दालककोरदूष-श्यामाकनीवारमुद्गमसूराढकीहरेणुकलायनिष्पावानशनविषमाशनवातमूत्रपुरीषशुक्रच्छर्दिक्षवथूद्गारबाष्पवेगविघातादिभिर्वि-शेषैर्वायुः प्रकोपमापद्यते (सु. सू. २१)। स शीताभ्रप्रवातेषु घर्मान्ते च विशेषतः। प्रत्यूषस्यपराह्णे च जीर्णेऽन्ने च प्रकुप्यति॥" (सु. सू. २१)

२. "रूक्षशीताल्पलघ्वन्नव्यवायातिप्रजागरैः। विषमादुपचाराच्च दोषासृक्स्रवणादति॥ लङ्घनप्लवनात्यध्वव्यायामाति-विचेष्टितैः। धातूनां संक्षयाच्चिन्ताशोकरोगातिकर्षणात्॥ दुःखशय्यासनात् क्रोधाद्दिवास्वप्नाद्भयादपि। वेग-संधारणादामादभिघातादभोजनात्॥ मर्माघाताद्गजोष्ट्राश्वशीघ्रयानापतंसनात्। देहे स्रोतांसि रिक्तानि पूरयित्वा-ऽनिलो बली। करोति विविधान् व्याधीन्।" (च. चि. २८)

३. "अथ तिक्तकटुकषायरूक्षलघुशीतविष्टम्भिविरूढकतृणधान्यकलायचणककरीरतुम्बककालिङ्गचिर्भिटबिसशालूकजाम्बवतिन्दु-कक्षीणशुष्कप्रमितपिताशनक्षुधिताम्बुपानासृक्स्रवविरेचनादिकर्मातियोगवेगविघातोदीरणरात्रिजागरणप्रवातव्यवायव्या-यामबलवद्युद्धनिग्रहातिखरचापकर्षणाश्वविषमलङ्घनाध्वाध्ययनधावनसलिलतरणाभिघातदम्यगोवाजिगजनिग्रहाश्म-शिलालोहकाष्ठोत्क्षेपभ्रमणचङ्क्रमणोत्सादनपराघातनादिसाहसभयशोकोत्कण्ठादिभिरतिसेवितैर्ग्रीष्मवर्षापराह्णा-पररात्राहारपरिणामान्तेषु वायुः प्रकोपमापद्यते।" (अ. सं. नि. १)

४. "तिक्तोषणकषायाल्परूक्षप्रमितभोजनैः। धारणोदीरणनिशाजागरात्युच्चभाषणैः। क्रियातियोगभीशोकचिन्ताव्यायाम-मैथुनैः। ग्रीष्माहोरात्रिभुक्तान्ते प्रकुप्यति समीरणः॥" (अ. हृ. नि. १)

पित्तप्रकोपणानि

१	क्रोधः	१६	पिण्याकः	३०	सुराविकाराः	४७	पीलु
२	शोकः	१७	कुलत्थः	३१	अम्लफलानि	४८	भल्लातकास्थि
३	भयम्	१८	सर्षपः	३२	कट्वरम्	४९	लाङ्गलिका
				३३	उष्णम्		
४	आयासः	१९	अतसी	३४	उष्णकालः	५०	मरिचम्
				३५	घनान्तः (शरद्)		
५	उपवासः	२०	हरितकशाकम्	३६	मध्याह्नः	५१	आतपः
				३७	अर्धरात्रः		
६	विदग्धम् (द्रव्यम्)		(कुठेरकादिवर्गः अ. सं.)	३८	अन्नस्य पच्यमानावस्था (सु. सू. २१)[1]	५२	अग्निः
७	मैथुनम्	२१	गोधामांसम्	३९	क्षारः	५३	रजः
८	कटुकम् (द्रव्यम्)	२२	मत्स्यमांसम्	४०	शुक्तम्	५४	धूमः
९	अम्लम् ,,	२३	आजमांसम्	४१	शाण्डाकी	५५	क्रोधः
१०	लवणम् ,,	२४	आविकमांसम्	४२	मूत्रम्	५६	ईर्ष्या
११	तीक्ष्णम् ,,	२५	दधि	४३	धान्याम्लम्	५७	अजीर्णं मैथुनं
				४३	(अ) माषः		
१२	उष्णम् ,,	२६	तक्रम्	४३	(आ) निष्पावः	५८	वर्षा
१३	विदाहि (अन्नपानम्)	२७	कूर्चिका	४४	तिलाम्लम्	५९	क्षुद्रोधः
१४	तिलाः	२८	मस्तु	४५	आम्रातकम् (अपक्वम्)	६०	तृषारोधः
१५	तैलम्	२९	सौवीरकम्	४६	अम्लिका		(अ. सं. नि. १)[3]

१ "क्रोधशोकभयायासोपवासविदग्धमैथुनोपगमनकट्वम्ललवणतीक्ष्णोष्णलघुविदाहितिलतैलपिण्याककुलत्थसर्षपातसी-हरितकशाकगोधामत्स्याजाविकमांसदधितक्रकूर्चिकामस्तुसौवीरकसुराविकाराम्लफलकट्वरप्रभृतिभिः पित्तं प्रकोपमापद्यते" "तदुष्णैरुष्णकाले च घनान्ते च विशेषतः । मध्याह्ने चार्धरात्रे च जीर्यत्यन्ने च कुप्यति" (सु. सू. २१)

२ "कट्वम्ललवणक्षारोष्णतीक्ष्णविदाहिशुक्तशाण्डाकीमद्यमूत्रमस्तुदधिधान्याम्लतैलकुलत्थमाषनिष्पावतिलाम्ल-कट्वरकुठेरादिवर्गाम्रातकाम्लीकापीलुभल्लातकास्थिलाङ्गलिकामरिचातपाग्निरजोधूमक्रोधेर्ष्याजीर्णमैथुनोपगमनादिभि-र्वर्षाशरन्मध्याह्नार्धरात्राहारविदाहकालेषु च पित्तम् (प्रकोपमापद्यते)"। (अ. सं. नि. १)

३ "विदाहिकटुकाम्लोष्णभोज्यैरत्युष्णसेवनात् । मध्याह्ने क्षुत्तृषो रोधाज्जीर्यत्यन्नेऽर्धरात्रके । पित्तं प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति ॥" (शा. प्र. २)

कफप्रकोपणानि

१. दिवास्वप्न:
२. अव्यायाम:
३. आलस्यम्
४. मधुरम् (मधुररसं द्रव्यम्)
५. अम्लम् (अम्लरसं द्रव्यम्)
६. लवणम् (लवणरसं द्रव्यम्)
७. शीतम् (शीतस्पर्श शीत-वीर्यं च द्रव्यम्)
८. स्निग्धम्
९. गुरु
१०. पिच्छिलम्
११. अभिष्यन्दि
१२. हायनकः
१३. यवकः
१४. नैषधः
१५. इत्कटः
१६. माषः
१६. (अ) महामाषः
१७. गोधूमः
१८. तिलविकृतयः
१९. पिष्टविकृतयः
२०. दधि
२१. दुग्धम्
२२. कृशरा
२३. पायसः
२४. इक्षुविकाराः (फाणितगुडशर्करादयः)
२५. आनूपमांसम्
२६. औदकमांसम्
२७. वसा
२८. बिसम्
२९. मृणालम्
३०. कसेरुकम्
३१. शृङ्गाटकम्
३२. मधुरफलम्
३३. वल्लीफलम्
३४. समशनम्
३५. अध्यशनम् (सु. सू. २१)[1]
३६. नवान्नम्
३७. पृथुकाः
३८. स्थूलभक्ष्यम् (लड्डुकादि)
३९. शष्कुल्यः
४०. आमक्षीरम्
४१. किलाटः
४२. मोरटः
४३. कूर्चिका
४४. तक्रपिण्डकः
४५. पीयूषम्
४६. इक्षुरसः
४७. कदलीफलम्
४७ (अ) खर्जूरम्
४८. भव्यम्
४९. नारिकेलम्
५०. निशाम्बुपानम्
५१. अत्यम्बुपानम्
५२. अतिसन्तर्पणम्
५३. भुक्तमात्रकालः
५३. (अ) दिवास्वापः
५४. कालातिस्वप्नः
५५. कायवाङ्मनो-व्यापारानारम्भः
५६. अनुपवानशयनम्
५७. अवश्यायः
५८. हर्षः
५९. छर्दिर्विघातः
६०. विरेचनाद्ययोगः (अ. सं. नि. १)[2]
६१. आस्यासुखम्
६२. स्वप्नसुखम्
६३. अजीर्णम् (अ. हृ. नि. १)[3]
६४. मन्दाग्निः (शा.प्र.२.)[4]

---

१ "दिवास्वप्नाव्यायामालस्यमधुराम्ललवणशीतस्निग्ध-गुरुपिच्छिलाभिष्यन्दिहायनकयवकनैषधेत्कटमाषम-हामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसे-क्षुविकारानूपौदकमांसवसाबिसमृणालकसेरुकशृङ्गाटक-मधुरवल्लीफलसमशनाध्यशनप्रभृतिभि: श्लेष्मा प्रकोपमापद्यते ॥ "स शीतैः शीतकाले च वसन्ते च विशेषतः। पूर्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति ॥" (सु. सू. २१)

२ "मधुराम्ललवणस्निग्धगुरुपिच्छिलाभिष्यन्दिनवान्न-पिष्टपृथुकस्थूलभक्ष्यशष्कुल्यामक्षीरकिलाटमोरट-कूर्चिकातक्रपिण्डकपीयूषेक्षुरसफाणितगुडानूपपिशि-तमोचखर्जूरभव्यनालिकेरनिशाम्बुपानात्यम्बुपाना-तिसन्तर्पणभुक्तमात्रदिवास्वप्नकालातिस्वप्नकायवा-ङ्मनोव्यापारानारम्भानुपवानशयनावश्यायहर्षच्छ-र्दिर्विघातविरेचनाद्ययोगादिभिः शिशिरवसन्त-पूर्वाह्णप्रदोषभुक्तमात्रेषु च श्लेष्मा (प्रकोपमापद्यते)।" (अ.सं.नि १)

३ "स्वाद्वम्ललवणगुर्वभिष्यन्दिशीतलैः। आस्यास्वप्न-सुखाजीर्णदिवास्वप्नातिबृंहणैः। प्रच्छर्दनाद्ययोगेन भुक्तमात्रवसन्तयोः। पूर्वाह्णे पूर्वरात्रे च श्लेष्मा"। (अ. हृ. नि १)

४ "मधुरस्निग्धशीतादिभोज्यैर्दिवसनिद्रया। मन्देऽग्नौ च प्रभाते च भुक्तमात्रे तथा श्रमात्। श्लेष्मा प्रकोपं याति"। (शा. प्र. २)

प्राणादिपञ्चविधवातानां प्रकोपहेतवः

प्राणप्रकोपहेतवः	उदानप्रकोपहेतवः	व्यानप्रकोपहेतवः	समानप्रकोपहेतवः	अपानप्रकोपहेतवः
१. रौक्ष्यम्	१. क्षवथुविधारणम्	१. अतिगमनम्	१. विषमभोजनम्	१. रूक्षान्नम्
२. व्यायामः	२. उद्गारविधारणम्	२. अतिध्यानम्	२. अजीर्णे भोजनम्	२. गुर्वन्नम्
३. लङ्घनम्	३. छर्दिविधारणम्	३. अतिक्रीडा	३. शीतभोजनम्	३. वेगविघातः
४. अत्याहारः	४. निद्राविधारणम्	४. विषमचेष्टितम्	४. संकीर्णभोजनम्	४. अतिवाहनम्
५. अभिघातः	५. गुर्वन्नपानम्	५. विरोध्यन्नपानम्	५. अकालशयनम्	५. अतियानयानम्
६. अध्वगमनम्	६. भारहरणम्	६. रूक्षम्	६. अकालजागरणम्	६. अत्यासनम्
७. वेगोदीरणम्	७. अतिरुदितम्	७. भयम्	(अ.सं.नि.१६)४	७. अतिस्थानम्
८. वेगधारणम्	८. अतिहसितम्	८. हर्षः		८. अतिचङ्क्रमणम्
(अ.सं.नि. १६)१	(अ.सं.नि. १६)२	९. विषादः		(अ.सं.नि.१६)५
		(अ.सं. नि.१६)३		

१ "वायौ पञ्चात्मके प्राणो रौक्ष्यव्यायामलङ्घनैः। अत्याहाराभिघाताध्ववेगोदीरणधारणैः ॥ कुपितः" (अ.सं.नि. १६)

२ "उदानः क्षवथूद्गारछर्दिनिद्राविधारणैः। गुरुभारातिरुदितहासाद्यैर्विकृतः"। (अ. सं. नि. १६)

३ "व्यानोऽतिगमनध्यानक्रीडाविषमचेष्टितैः। विरोधिरूक्षभीहर्षविषादाद्यैश्च दूषितः।" (अ.सं.नि. १६)

४ "समानो विषमाजीर्णशीतसंकीर्णभोजनैः। करोत्यकालशयनजागराद्यैश्च दूषितः।" (अ.सं.नि.१६)

५ "अपानो रूक्षगुर्वन्नवेगाघातातिवाहनैः। यानासनस्थानचङ्क्रमैश्चातिसेवितैः" (अ.सं.नि. १६)

वात-पित्त-कफकरा (प्रकोपकाः) रसाः

वातप्रकोपका रसाः	पित्तप्रकोपका रसाः	कफप्रकोपका रसाः
१. कटुः	१. कटुः	१. मधुरः
२. तिक्तः	२. अम्लः	२. अम्लः
३. कषायः (च. सू. १)[1]	३. लवणः (च. सू. १)[1]	३. लवणः (च. सू. १)[1]

वात-पित्त-कफकरा (प्रकोपकाः) विपाकाः

वातकरो विपाकः	पित्तकरो विपाकः	कफकरो विपाकः
१. कटुविपाकः (च. सू. २६)[2]	१ अम्लविपाकः (च.सू.२६)[2]	१. मधुरविपाकः (च. सू. २६)[2]
२. लघुविपाकः (सु. सू. ४१)[3]		२. गुरुविपाकः (सु. सू. ४१)[3]

वात-पित्त-कफप्रकोपकाः कालाः

वातप्रकोप(वृद्धि)कालाः	पित्तप्रकोप(वृद्धि)कालाः	कफप्रकोप(वृद्धि)कालाः
१. शीतकालः	१. उष्णकालः	१. शीतकालः
२. अभ्रकालः	२. शरदृतुः	२. वसन्तर्तुः
३. प्रवातकालः	३. मध्याह्नकालः	३. पूर्वाह्णकालः
४. प्रावृडृतुः	४. अर्धरात्रकालः	४. प्रदोषकालः
५. प्रत्यूषःकालः	५. अन्नजरणकालः (सु. सू. २१)[5]	५. भुक्तमात्रकालः (सु. सू. २१)[6]
६. अपराह्णकालः	६. वर्षा (अ. सं. नि. १)[8]	
७. अन्नपरिणामकालः (सु. सू. २१)[4]		
८. ग्रीष्मः		
९. अपररात्रः (अ. सं. नि. १)[7]		

---

१ 'कट्वम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफम् । कटुतिक्तकषायाश्च कोपयन्ति समीरणम् ।' (च. सू. १) ।

२ "शुक्रहा बद्धविण्मूत्रो विपाको वातलः कटुः । मधुरः सृष्टविण्मूत्रो विपाकः कफशुक्रलः । पित्तकृत्सृष्टविण्मूत्रः पाकोऽम्लः शुक्रनाशनः" (च. सू. २६)

३ "गुरुपाकः सृष्टविण्मूत्रतया कफोत्क्लेशेन च. लघुर्बद्धविण्मूत्रतया मारुतकोपेन च ।' (सु. सू. ४१)

४ "स शीताभ्रप्रवातेषु घर्मान्ते च विशेषतः । प्रत्यूषस्यपराह्णे च जीर्णेऽन्ने च प्रकुप्यति" (सु. सू. २१)

५ "तदुष्णैरुष्णकाले च घनान्ते च विशेषतः । मध्याह्ने चार्धरात्रे च जीर्यत्यन्ने च कुप्यति ॥" (सु. सू. २१)

६ "स शीतैः शीतकाले च वसन्ते च विशेषतः । पूर्वाह्णे च प्रदोषे च भुक्तमात्रे च कुप्यति ॥ (सु. सू. २१)

७ ग्रीष्मवर्षापराह्णापररात्राहारपरिणामान्तेषु वायुः प्रकोपमापद्यते । (अ. सं. नि. १)

८ "वर्षाशरन्मध्याह्नार्धरात्राहारविदाहकालेषु पित्तं प्रकोपमापद्यते ॥' (अ. सं. नि. १)

रसादिधात्वाश्रितेषु दोषेषु जायमाना विकाराः

त्वगाश्रिते वाते जायमानाः विकाराः	रक्तस्थिते वाते जायमानाः विकाराः	मांसस्थिते वाते जायमानाः विकाराः
१. त्वचो रूक्षता	१. ससंतापा तीव्रा रुजः	१. अङ्गगौरवम्
२. त्वचः स्फुटितत्वम् (स्फुटनम् अ. सं.)	२. वैवर्ण्यम्	२. अङ्गेऽत्यर्थंन्तोदः
३. त्वचः सुप्तता	३. कृशता	३. दण्डमुष्टिहननमिवाङ्गेषु पीडा स्तब्धत्वम् (अ. सं)
४. त्वचः कृशता	४. अरुचिः	४. अङ्गरुजा
५. त्वचः कृष्णवर्णता	५. गात्रे अरूंषि (व्रणाः)	५. अङ्गानामत्यर्थं श्रमितत्वम् (च. चि. २८)६
६. त्वचस्तोदः	६. भुक्तस्य (अन्नस्य)स्तम्भः (च. चि. २८)३	६. सशूला ग्रन्थयः (सु. नि. १)७
७. त्वचो विस्तारः	७. व्रणाः (सु. नि. १)४	७. तोदाढ्याः कर्कशा ग्रन्थयः
८. त्वचः सराग(रक्त)ता	८. स्वापः	८. भ्रमः (अ. सं. नि. १५)८
९. पर्वरुजा (च. चि. २८) १	९. रागः	
१०. त्वचो वैवर्ण्यम्	१०. भ्रमः (अ. सं. नि. १५)५	
११. त्वचः स्फुरणम्		
१२. त्वचश्चुमचुमायनम्		
१३. त्वचो भेदः		
१४. त्वचः परिपोटनम् (सु. नि. १)२		

---

१ "त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते। आतन्यते सरागा च पर्वरुक् त्वक्स्थितेऽनिले।" (च. चि. २८)

२ "वैवर्ण्यं स्फुरणं रौक्ष्यं सुप्तिं चुमचुमायनम्। त्वक्स्थो निस्तोदनं र्याश्चर्भेदं परिपोटनम्।" (सु. नि. १)

३ "रुजस्तीव्राः ससंतापा वैवर्ण्यं कृशताऽरुचिः। गात्रे चारूंषि भुक्तस्य स्तम्भश्चासृग्गतेऽनिले।" (च. चि. २८)

४ "व्रणांश्च रक्तगः" (सु. नि. १)।

५ "रक्ते तीव्रां रुजां स्वापस्तापं रागं विवर्णताम्। अरूंष्यन्नस्य विष्टम्भमरुचिं कृशतां भ्रमम्।" (अ. सं. नि १५)

६ "गुर्वङ्गं तुद्यतेऽत्यर्थं दण्डमुष्टिहतं यथा। सरुक् श्रमितमत्यर्थं मांसमेदोगतेऽनिले।" (च. चि. २८)

७ "ग्रन्थीन् सशूलान् मांसाश्रितः" (सु. नि. १.)

८ "मांसमेदोगतो ग्रन्थींस्तोदाढ्यान् कर्कशान् भ्रमम्।" (अ. सं. नि. १५)।

रसादिधात्वाश्रितेषु दोषेषु जायमाना विकाराः

मेदस्थिते वाते जायमाना विकाराः	अस्थिस्थिते वाते जायमाना विकाराः	मज्जाश्रिते वाते जायमाना विकाराः	शुक्राश्रिते वाते जायमाना विकाराः
१. अङ्गगौरवम्	१. अस्थिपर्वभेदः	१. अस्थिपर्वभेदः	१. शुक्रस्य शीघ्रं मोक्षः
२. अङ्गेऽत्यर्थं तोदः	२. सन्धिशूलम्	२. सन्धिशूलम्	२. गर्भस्य शीघ्रं मोक्षः
३. दण्डमुष्टिहननमिवाङ्गेषु पीडा; अङ्गरुजा अङ्गानामत्यर्थम्	३. मांसक्षयः	३. मांसक्षयः	३. शुक्रस्य शीघ्रं बन्धः
४. श्रमितत्वम् (च. चि. २८)[1]	४. बलक्षयः	४. बलक्षयः	४. गर्भस्य शीघ्रं बन्धः
५. मन्दरुजोऽव्रणा ग्रन्थयः (सु. नि. १)[2]	५. अस्वापः	५. अस्वापः	५. शुक्रविकृतिः
६. तोदाढ्या कर्कशाः ग्रन्थयः	६. सतता रुक् (च. चि. २८)[4]	६. सतता रुक् (च. चि. २८)[4]	६. गर्भविकृतिः (च. चि. २८)[9]
७. श्रमः (अ. सं. नि. १५)[3]	७. अस्थिशोषः	७. निरन्तरं रुजा (सु. नि. १)[7]	७. शुक्राप्रवृत्तिः
	८. अस्थिप्रभेदः	८. अस्थिशौषिर्यम्	८. शुक्रस्य विकृता प्रवृत्तिः (सु. नि. १)[10]
	९. अस्थिशूलम् (सु. नि. १)[5]	९. स्तब्धता (अ. सं. नि. १५)[8]	
	१०. सक्थिशूलम् (अ. सं. नि. १५)[6]		

---

१ "गुर्वङ्गं तुद्यतेऽत्यर्थं दण्डमुष्टिहतं यथा। सरुक् श्रमितमत्यर्थं मांसमेदोगतेऽनिले।" (च. चि. २८)

२ 'तथा मेदःश्रितः कुर्याद्ग्रन्थीन्मन्दरुजोऽव्रणान्' (सु. नि. १)।

३ 'मांसमेदोगतो ग्रन्थींस्तोदाढ्यान् कर्कशान् श्रमम्।' (अ. सं. नि. १५)।

४ 'मेदोऽस्थिपर्वणां सन्धिशूलमांसबलक्षयः। अस्वप्नः संतता रुक् च मज्जास्थिकुपितेऽनिले।' (च. चि. २८)।

५ 'अस्थिशोषं प्रभेदं च कुर्याच्छूलं च तच्छ्रितः।' (सु.नि.१)

६ 'अस्थिस्थः सक्थिसन्ध्यस्थिशूलं तीव्रं बलक्षयम्।' (अ. सं. नि. १५)

७ 'तथा मज्जगते रुक् च न कदाचित् प्रशाम्यति।' (सु.नि.१)

८ 'मज्जस्थोऽस्थिशौषिर्यमस्वप्नं स्तब्धतां रुजम्।' (अ. सं. नि. १५)

९ 'क्षिप्रं मुञ्चति बध्नाति शुक्रं गर्भमथापि वा। विकृतिं जनयेच्चापि शुक्रस्थः कुपितोऽनिलः' (च. चि. २८)

१० 'अप्रवृत्तिः प्रवृत्तिर्वा विकृता शुक्रगेऽनिले।' (सु.नि. १)

रसादिधात्वाश्रितेषु दोषेषु जायमाना विकाराः

स्नायुगते वाते जायमाना विकाराः	सिरागते वाते जायमाना विकाराः	सन्धिगते वाते जायमाना विकाराः
१. बाह्यायामः	१. शरीरे मन्दरुक् शोथश्च	१. वातपूर्णदृतिस्पर्शः शोथः
२. अभ्यन्तरायामः	२. शरीरशोषः	२. सन्धीनां प्रसारणाकुञ्चनयोः सवेदना प्रवृत्तिः (च. चि. २८)७
३. खल्लिः	३. शरीरस्पन्दनम्	३. सन्धीनां प्रसारणाकुञ्चनयो-रसामर्थ्यम्
४. कुब्जत्वम्	४. सिरासुप्तिः	४. सन्धिशूलम् (सु. नि. १)८
५. सर्वाङ्गरोगः	५. सिराणां तनुत्वं महत्ता वा (च. चि. २८)४	
६. एकाङ्गरोगः (च. चि. २८)१	६. सिराणां शूलम्	
७. स्तम्भः	७. सिराणामाकुञ्चनम्	
८. कम्पः	८. सिराणां पूरणम् (सु.नि.१)५	
९. शूलम्	९. सिराध्मानम्	
१०. आक्षेपः (सु. नि. १)२	१०. सिरारिक्तता (अ. सं. नि. १५)६	
११. गृध्रसी (अ. सं. नि. १५)३		

१ "बाह्याभ्यन्तरमायामं खल्लिं कुब्जत्वमेव च। सर्वाङ्गैकाङ्ग-रोगांश्च कुर्यात् स्नायुगतोऽनिलः।" (च. चि. २८)

२ "स्नायुप्राप्तः स्तम्भकम्पौ शूलमाक्षेपणं तथा।" (सु. नि. १)

३ "स्नाय्वास्थितः कुर्याद् गृध्रस्याक्षेपकुब्जताः।" (अ.सं.नि.१५)

४ "शरीरं मन्दरुक् शोथं शुष्यति स्पन्दते तथा। सुप्तास्तन्व्यो महत्यो वा सिरा वाते सिरागते।" (च. चि. २८)

५ "कुर्यात् सिरागतः शूलं सिराकुञ्चनपूरणम्।" (सु. नि. १)

६ "सिरास्वाध्मानरिक्तत्वे। (अ. सं. नि. १५)

७ 'वातपूर्णदृतिस्पर्शः शोथः सन्धिगतेऽनिले। प्रसारणा-कुञ्चनयोः प्रवृत्तिश्च सवेदना।' (च. चि. २८)

८ 'हन्ति सन्धिगतः सन्धीन् शूलशोथौ करोति च।' (सु.नि.१)

इन्द्रियगते वाते जायमाना विकाराः	आमाशयगते वाते जायमाना विकाराः	पक्वाशयस्थे वाते जायमाना विकाराः
१. इन्द्रियवधः	१. छर्दिः	१. अन्त्रकूजनम्
(च. चि. २८)१	२. मोहः	२. नाभिशूलम्
	३. मूर्च्छा	३. कृच्छ्रमूत्रत्वम्
	४. पिपासा	४. कृच्छ्रपुरीषत्वम्
	५. हृद्ग्रहः	५. आनाहः
	६. पार्श्ववेदना	६. त्रिकवेदना
	(सु.नि. १)२	(सु.नि.१)५
	७. हृदयरुजा	७. शूलम्
	८. नाभिरुजा	८. आटोपः
	९. उदररुजा	(च. चि. २८)६
	१०. उद्गारः	९. मलरोधः
	११. विसूचिका	१०. अश्मरी
	१२. कासः	११. वर्ध्म
	१३. कण्ठशोषः	१२. अर्शः
	१४. आस्यशोषः	१३. पृष्ठग्रहः
	१५. श्वासः	१४. कटीग्रहः
	(च. चि. २८)३	१५. अधरकाये कृच्छ्रोपद्रवाः
	१६. कण्ठोपरोधः	(अ. सं. नि. १५)७
	(अ.सं.नि. १५)४	

---

१. "श्रोत्रादिष्विन्द्रियवधं कुर्याद्दुष्टः समीरणः।" (च.चि. २८)

२. "वायुरामाशये क्रुद्धः कुर्याच्छर्द्यादिकान् गदान्। मोहं मूर्च्छां पिपासां च हृद्ग्रहं पार्श्ववेदनाम्।" (सु. नि. १)

३. "हृन्नाभिपार्श्वोदररुक्तृष्णोद्गारविसूचिकाः। कासः कण्ठास्यशोषश्च श्वासश्चामाशयस्थिते। (च.चि. २८)।

४. "आमाशये तृड्वमथुश्वासकासविसूचिकाः। कण्ठोपरोधमुद्गारान् व्याधीनूर्ध्वं च नाभितः॥ (अ. सं. नि. १५)।

५. "पक्वाशयस्थोऽन्त्रकूजं शूलं नाभौ करोति च। कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम्।" (सु.नि.१)

६ "पक्वाशयस्थोऽन्त्रकूजं शूलाटोपौ करोति च। कृच्छ्रमूत्रपुरीषत्वमानाहं त्रिकवेदनाम्।" (च.चि. २८)

७ "तत्र पक्वाशये क्रुद्धः शूलानाहान्त्रकूजनम्। मलरोधाश्मवर्ध्मार्शस्त्रिकपृष्ठकटीग्रहम्॥ करोत्यधरकाये च तांस्तान्कृच्छ्रानुपद्रवान्। (अ. सं. नि.१५)

कोष्ठाश्रिते वाते जायमाना विकाराः

१. मूत्रनिग्रहः
२. वर्चोनिग्रहः
३. ब्रध्नः
४. हृद्रोगः
५. गुल्मः
६. अर्शः
७ पार्श्वशूलम्

(च.चि. २८)१

गुदाश्रिते वाते जायमाना विकाराः

१. विड्ग्रहः
२. मूत्रग्रहः
३. वातग्रहः
४. शूलम्
५. आध्मानम्
६. अश्मरी
७. शर्करा
८. जङ्घारुक्
९. ऊरुरुक्
१०. त्रिकरुक्
११. पादरुक्
१२. पृष्ठरुक्
१३. जङ्घाशोषः
१४. ऊरुशोषः
१५. त्रिकशोषः
१६. पादशोषः
१७. पृष्ठशोषः

(च.चि.२८)२

सर्वांगकुपिते वाते जायमाना विकाराः

१. गात्रस्फुरणम्
२. गात्रभञ्जनम्
३. सन्धिवेदना
४. सन्धिस्फुरणम्

(च. चि. २८)३

५. स्तम्भनम्
६. आक्षेपणम्
७. स्वापः
८. शोफः
९. शूलम् (सु.नि. १)४
१०. तोदः
११. भेदः
१२. स्फुरणम्
१३. भञ्जनम्
१४. सन्ध्याकुञ्चनम्
१५. कम्पनम्

(अ. सं. नि. १५)५

---

१ "तत्र कोष्ठाश्रिते वाते निग्रहो मूत्रवर्चसोः। ब्रध्नहृद्रोगगुल्मार्शःपार्श्वशूलं च जायते।" (च. चि. २८)

२ "ग्रहो विण्मूत्रवातानां शूलाध्मानाश्मशर्कराः। जङ्घोरुत्रिकपात्पृष्ठरोगशोषौ गुदस्थिते।(च.चि.२८)

३ "सर्वांगकुपिते वाते गात्रस्फुरणभञ्जने। वेदनाभिः परीतश्च स्फुटन्तीवास्य सन्धयः।" (च.चि.२८)

४ "स्तम्भनाक्षेपणस्वापशोफशूलानि सर्वगः।" (सु.नि.१)

५ "सर्वाङ्गसंश्रयस्तोदभेदस्फुरणभञ्जनम्। स्तम्भनाक्षेपणस्वापसन्ध्याकुञ्चनकम्पनम्।" (अ.सं.नि.१५)

रसा(धात्वा)दिषु स्थिते पित्ते जायमाना विकाराः

त्वग्गते पित्ते जायमाना विकाराः

१. विस्फोटकाः
२. मसूरिका

रक्तगते पित्ते जायमाना विकाराः

१. विसर्पः
२. दाहः

मांसगते पित्ते जायमाना विकाराः

१. मांसपाकः
२. मांसप्रकोथः

मेदःस्थिते पित्ते जायमाना विकाराः

१. सदाहा ग्रन्थयः
२. स्वेदातिप्रवृत्तिः
३. तृषा

अस्थिस्थिते पित्ते जायमाना विकाराः

१. भृशं दाहः

मज्जस्थिते पित्ते जायमाना विकाराः

१. हारिद्रनखता
२. हारिद्रनेत्रता

शुक्रस्थिते पित्ते जायमाना विकाराः

१. पूतिशुक्रता
२. पीतावभासशुक्रता

सिरागते पित्ते जायमाना विकाराः

१. क्रोधः
२. प्रलापः

स्नायुगते पित्ते जायमाना विकाराः

१. तृषा

कोष्ठगते पित्ते जायमाना विकाराः

१. मदः
२. तृषा
३. दाहः
४. सर्वदेहव्यापिनोऽन्ये पित्तरोगाः

(अ. सं. सू. १८)[1]

---

१. 'पित्तं त्वचि स्थितं कुर्याद् विस्फोटकमसूरिकाः। रक्ते विसर्पं दाहं च मांसे पाकप्रकोथनम्। सदाहान्मेदसि ग्रन्थीन् स्वेदात्युद्गमनं तृषाम्। अस्थ्नि दाहं भृशं मज्ज्ञि हारिद्रनखनेत्रताम्। पूति पीतावभासं च शुक्रं शुक्रसमाश्रितम्। कोष्ठगं मदतृड्दाहान् व्यापिनोऽन्यांश्च यक्ष्मणः।
* शिरागतं क्रोधनतां प्रलापम्। स्नायुगं तृषम्।
(अ. सं. सू. १८)

त्वगा(रसा)दिषु स्थिते श्लेष्मणि जायमाना विकाराः

त्वग्गते कफे
जायमाना विकाराः
१. स्तम्भः
२. श्वेताङ्गता

रक्तगते कफे
जायमाना विकाराः
१. पाण्डुरोगः

मांसगते कफे
जायमाना विकाराः
१. अर्बुदानि
२. अपची
३. आर्द्रचर्मावनद्धाभ-गात्रता
४. अतिगौरवम्

मेदोगते कफे
जायमाना विकाराः
१. स्थूलता
२. मेहः

अस्थिगते कफे
जायमाना विकाराः
१. अस्थिस्तब्धता

मज्जगे कफे
जायमाना विकाराः
१. शुक्लनेत्रता

शुक्रगते कफे
जायमाना विकाराः
१. शुक्रसंचयः

सिरागते कफे
जायमाना विकाराः
१. विबन्धः
२. अतिगौरवम्
३. स्तब्धगात्रता

स्नायुगते कफे
जायमाना विकाराः
१. सन्धिशूल(न)म्

कोष्ठगते कफे
जायमाना विकाराः
१. जठरोन्नतिः
२. अरोचकः
३. अविपाकः
४. अन्ये च कफजा रोगाः

(अ. सं. सू. १९)[1]

---

१ 'श्लेष्मा त्वचि स्थितः कुर्यात् स्तम्भं श्वेतावभासताम्। पाण्ड्वामयं शोणितगो मांसस्थोऽर्बुदापचीः ॥ आर्द्रचर्मावनद्धाभगात्रतां चातिगौरवम्। मेदोगः स्थूलतां मेहमस्थ्नां स्तब्धत्वमस्थिगः ॥ मज्जगः शुक्लनेत्रत्वं शुक्रस्थः शुक्रसंचयम्। विबन्धं गौरवं चाति सिरास्थः स्तब्धगात्रताम् ॥ स्नायुस्थः सन्धिशूलं च कोष्ठगो जठरोन्नतिम्। अरोचकाविपाकौ च तांस्तांश्च कफसंभवान् ॥ (अ. सं. सू. १९)

पित्ताद्यावृतवातलक्षणानि

पित्तावृतवातलिङ्गानि

१. दाहः
२. तृष्णा
३. शूलम्
४. भ्रमः
५. तमः
६. कट्वम्लोष्णलवणै-
 र्विदाहः
७. शीतकामिता
 (च. चि. २८)
८. संतापः
९. मूर्च्छा
 (सु. नि. १)२

कफावृतवातलिङ्गानि

१. शैत्यम्
२. गौरवम्
३. शूलम्
४. कटुतिक्तकषायरूक्षो-
 ष्णैरुपशयः
५. लङ्घनकामिता
६. आयासकामिता
७. रूक्षकामिता
८. उष्णकामिता
 (च. चि. २८)३
९. शोथः
 (सु. नि. १)४

रक्तावृतवातलिङ्गानि

१. त्वङ्मांसान्तरे सदाहार्तिः
२. सरागः शोथः
३. रक्तमण्डलानि
 (च. चि. २८)५
४. निस्तोदः
५. स्पर्शद्वेषः
६. प्रसुप्तता
७. पित्तविकाराः
 (सु. नि. १)६

मांसावृतवातलिङ्गानि

१. कठिना विवर्णाश्च पिडकाः
२. कठिनो विवर्णश्च श्वयथुः
३. रोमहर्षः
४. पिपीलिकासंचार इव-
 प्रतीतिः (च. चि. २८)७

मेदसाऽऽवृते वाते लिङ्गानि

१. अङ्गेषु चलः स्निग्धो
 मृदुः शीतश्च शोथः
 (आढ्यवातः)
२. अरुचिः
 (च. चि. २८)८

अस्थ्यावृते वाते लिङ्गानि

१. उष्णस्पर्शस्य पीडनस्य
 चाभिनन्दनम्
२. संभज्यत इव वेदना
३. सादः
४. तोदः (च. चि. २८)९
५. शूलम् (अ.सं.नि.१६)१०

मज्जावृते वाते लिङ्गानि

१. विनामः
२. जृम्भणम्
३. परिवेष्टनम्
४. शूलम्
५. पाणिभ्यां पीड्यमाने
 सुखावाप्तिः (च.चि.२८)११

शुक्रावृते वाते लिङ्गानि

१. शुक्रस्य अवेगोऽतिवेगो वा
२. शुक्रस्य निष्फलत्वम्
 (च. चि. २८)१२

---

१ "लिङ्गं पित्तावृते दाहस्तृष्णाशूलं भ्रमस्तमः। कट्वम्ललवणोष्णैश्च विदाहः शीतकामिता ॥" (च. चि. २८)

२ "दाहसंतापमूर्च्छाः स्युर्वायौ पित्तसमन्विते" (सु.नि.१)

३ "शैत्यगौरवशूलानि कट्वाद्युपशयोऽधिकम्। लङ्घनायासरूक्षोष्णकामिता च कफावृते" (च. चि. २८)

४ "शैत्यशोथगुरुत्वानि तस्मिन्नेव कफावृते" (सु. नि. १)

५ 'रक्तावृते सदाहार्तिस्त्वङ्मांसान्तरजो भृशम्। भवेत्सरागः श्वयथुर्जायन्ते मण्डलानि च" (च. चि. २८)

६ "सूचीभिरिव निस्तोदः स्पर्शद्वेषः प्रसुप्तता। शेषाः पित्तविकाराः स्युर्मारुते शोणितान्विते ।(सु. नि. १)

७ 'कठिनाश्च विवर्णाश्च पिडकाः श्वयथुस्तथा। हर्षः पिपीलिकानां च संचार इव मांसगे" (च. चि. २८)

८ "चलः स्निग्धो मृदुः शीतः शोथोऽङ्गेष्वरुचिस्तथा। आढ्यवात इति ज्ञेयः स कृच्छ्रो मेदसाऽऽवृतः॥" (च. चि. २८)

९ 'स्पर्शमस्थ्नाऽऽवृते तूष्णं पीडनं चाभिनन्दति। संभज्यते सीदति च सूचीभिरिव तुद्यते ॥" (च. चि २८)

१० "सूच्येव तुद्यतेऽत्यर्थमङ्गं सीदति शूल्यते" (अ.सं.नि.१६)

११ "मज्जावृते विनामः स्याज्जृम्भणं परिवेष्टनम्। शूलं च पीड्यमाने च पाणिभ्यां लभते सुखम्" (च. चि. २८)

१२ "शुक्रावेगोऽतिवेगो वा निष्फलत्वं च शुक्रगे।"(च.चि.२८)

पित्तावृतेषु प्राणाद्येषु लिङ्गानि

पित्तावृते प्राणे लिङ्गानि	पित्तावृत उदाने लिङ्गानि	पित्तावृते समाने लिङ्गानि	पित्तावृते व्याने लिङ्गानि	पित्तावृतेऽपाने लिङ्गानि
१. मूर्च्छा	१. मूर्च्छा	१. अतिस्वेदः	१. सर्वाङ्गदाहः	१. हारिद्रमूत्रत्वम्
२. दाहः	२. दाहः (अन्तर्दाहः) (अ. सं.)	२. तृषा	२. क्लमः	२. हारिद्रवर्चस्त्वम्
३. भ्रमः	३. भ्रमः	३. दाहः	३. ससंतापवेदनो गात्रविक्षेपसङ्गः (अङ्गचेष्टासंगः अ. सं.) (च.चि. २८)४	३. गुदतापः
४. शूलम् (रुजा. अ. सं.)	४. शूलम्	४. मूर्च्छा		४. मेढ्रतापः
५. विदाहः	५. विदाहः	५. अरुचिः (अरतिः, अ. सं.)		५. आर्तवस्यातिप्रवृत्तिः (च.चि.२८)५
६. शीतकामिता	६. शीतकामिता	६. ऊष्मण उपघातः (च. चि. २८)३		६. दाहः
७. विदग्धस्यान्नस्य छर्दनम् (च.चि. २८)१	७. विदग्धस्यान्नस्य छर्दनम्			७. अतिरुजा
	८. नाभिदाहः			८. योनितापः (अ. सं.नि. १६)६
	९. उरोदाहः			
	१०. क्लमः			
	११. ओजोभ्रंशः			
	१२. सादः (च. चि. २८)२			

१ "मूर्च्छा दाहो भ्रमः शूलं विदाहः शीतकामिता। छर्दनं च विदग्धस्य प्राणे पित्तसमावृते ॥" (च. चि. २८)

२ "मूर्च्छाद्यानि च रूपाणि दाहो नाभ्युरसः क्लमः। ओजोभ्रंशश्च सादश्चाप्युदाने पित्तसंवृते" (च. चि. २८)

३ "अतिस्वेदस्तृषा दाहो मूर्च्छा चारुचिरेव च। पित्तावृते समाने स्यादुपघातस्तथोष्मणः ॥" (च.चि.२८)

४ "व्याने पित्तावृते तु स्याद्दाहः सर्वाङ्गगः क्लमः। गात्रविक्षेपसङ्गश्च ससंतापः सवेदनः" (च. चि. २८)

५ "हारिद्रमूत्रवर्चस्त्वं तापश्च गुदमेढ्रयोः। लिङ्गं पित्तावृतेऽपाने रजसश्चातिवर्तनम्" (च. चि. २८)

६ "दाहश्च स्यादपाने तु मले हारिद्रवर्णता। रजोऽतिवृद्धिस्तापश्च योनिमेहनपायुषु ॥" (अ. सं. नि. १६)

कफावृतेषु प्राणाद्येषु वातेषु लिङ्गानि

कफावृते प्राणे लिङ्गानि	कफावृत उदाने लिङ्गानि	कफावृते समाने लिङ्गानि	कफावृते व्याने लिङ्गानि	कफावृतेऽपाने लिङ्गानि
१. निष्ठीवनम्	१. वैवर्ण्यम्	१. अस्वेदः	१. गात्रगुरुता	१. भिन्नवर्चः प्रवर्तनम्
२. क्षवथुग्रहः	२. वाग्ग्रहः	२. अग्निमान्द्यम्	२. सन्धिग्रहः	२. आमवर्चःप्रवर्तनम्
३. उद्गारग्रहः	३. स्वरग्रहः	३. लोमहर्षः	३. अस्थिग्रहः	३. श्लेष्मसंसृष्टवर्चः-प्रवर्तनम्
४. निःश्वासग्रहः				
५. उच्छ्वासग्रहः	४. दौर्बल्यम्	४. गात्रातिशीतता (च. चि. २८)५	४. अधिकं गतिसङ्गः (च. चि. २८)६	४. गुरुवर्चःप्रवर्तनम्
६. अरुचिः	५. गुरुगात्रत्वम्	५. कफाधिका विट्	५. वाग्ग्रहः	५. कफमेहः (च.चि.२८)८
७. छर्दिः (च.चि.२८)१	६. अरुचिः (च.चि.२८)३	६. कफाधिकं मूत्रम् (सु.नि.१)१५	६. गमने भृशं स्खलितत्वम् (अ.सं.नि. १६)७	
८. सादः	७. बलनाशः			५. सकफयोर्मूत्रशकृतोः प्रवर्तनम् (अ.सं.नि.१६)९
९. तन्द्रा (अ.सं.१६)२	८. वर्णप्रणाशः (अ.सं.नि.१६)४		७. अस्थिपर्वणां स्तम्भः (सु.नि.१)१६	
१०. दौर्बल्यम् (सु.नि.१)१३	९. अस्वेदः			६. अधःकायगुरुत्वम् (सु.नि.१)१७
	१०. अहर्षः			
	११. मन्दाग्निः			
	१२. शीतता			
	१३. स्तम्भः (सु.नि.१)१४			

पञ्चविधवातानामन्योन्यावरणे लिङ्गानि

व्याने प्राणावृते लिङ्गानि	प्राणे व्यानावृते लिङ्गानि	प्राणावृते समाने लिङ्गानि
१. सर्वेन्द्रियाणां शून्यत्वम्	१. अतिस्वेदः	१. जडता
२. स्मृतिक्षयः	२. लोमहर्षः	२. गद्गदता
३. बलक्षयः (च.चि.२८)१०	३. त्वग्दोषः	३. मूकता (च.चि.२८)१२
	४. गात्रसुप्तता (च.चि.२८)११	

---

१. "ष्ठीवनं क्षवथूद्गारनिःश्वासोच्छ्वाससंग्रहाः । प्राणे कफावृते रूपाण्यरुचिश्छर्दिरेव च" ॥ (च. चि. २८)

२. "श्लेष्मणा त्वावृते प्राणे सादस्तन्द्राऽरुचिर्वमिः । ष्ठीवनक्षवथूद्गारनिश्वासोच्छ्वाससंग्रहाः ।" (अ.सं.नि. १६)

३. "आवृते श्लेष्मणोदाने वैवर्ण्यं वाक्स्वरग्रहः । दौर्बल्यं गुरुगात्रत्वमरुचिश्चोपजायते ' (च. चि. २८)

४. " उदाने गुरुगात्रत्वमरुचिर्वाक्स्वरग्रहः । बलवर्णप्रणाशश्च" (अ. सं. नि. १६)

५. "अस्वेदो वह्निमान्द्यं च लोमहर्षस्तथैव च । कफावृते समाने स्याद्गात्राणां चातिशीतता । ' (च.चि.२८)

६. "गुरुता सर्वगात्राणां सर्वसन्ध्यस्थिजा रुजः । व्याने कफावृते लिङ्गं गतिसङ्गस्तथाऽधिकः । " (च.चि.२८)

७. ' व्याने पर्वास्थिवाग्ग्रहः । गुरुताङ्गेषु सर्वेषु स्खलितं च गतौ भृशम् । ' (अ. सं. नि. १६)

८. "भिन्नामश्लेष्मसंसृष्टगुरुवर्चःप्रवर्तनम् । श्लेष्मणा संवृतेऽपाने कफमेहस्य चागमः । " (च.चि.२८)

९. " अपाने सकफं मूत्रशकृतोः स्यात् प्रवर्तनम् । " (अ. सं. नि. १६)

१०. "सर्वेन्द्रियाणां शून्यत्वं ज्ञात्वा स्मृतिबलक्षयम् । व्याने प्राणावृते (लिङ्गम्)" (च. चि. २८)

११. " स्वेदोऽत्यर्थं लोमहर्षस्त्वग्दोषः सुप्तगात्रता । प्राणे व्यानावृते (लिङ्गम्) ' (च. चि. २८)

१२. " प्राणावृते समाने स्युर्जडगद्गदमूकताः ।" (च.चि)

१३. "दौर्बल्यं सदनं तन्द्रा वैवर्ण्यं च कफावृते" (सु.नि.१)

१४. "अस्वेदहर्षौ मन्दोऽग्निः शीतस्तम्भौ कफावृते । (सु.नि.१)

१५. "कफाधिकञ्च विण्मूत्रं रोमहर्षः कफावृते । "(सु.नि.१)

१६. "गुरूणि सर्वगात्राणि स्तम्भनं चास्थिपर्वणाम् । लिंगं कफावृते व्याने चेष्टास्तम्भस्तथैव च । (सु.नि.१)

१७. "अधःकायगुरुत्वं च तस्मिन्नेव कफावृते ।"(सु.नि.१)

पञ्चविधवातानामन्योन्यावरणे लिङ्गानि

समानेनावृतेऽपाने लिङ्गानि

१. ग्रहणीरोगः
२. पार्श्वग्रहः
३. हृद्ग्रहः
४. आमाशयशूलम्
(च. चि. २८)१

प्राणावृत उदाने लिङ्गानि

१. शिरोग्रहः
२. प्रतिश्याय:
३. निश्वासोच्छ्वाससंग्रहः
४. हृद्रोगः
५ मुखशोषः
(च. चि. २८)२

उदानावृते प्राणे लिङ्गानि

१. क्रियानाशः
२. ओजोनाशः
३. बलनाशः
४. वर्णनाशः
५. मृत्युः
(च. चि. २८)३

अन्नावृते वाते लिङ्गानि

१. भुक्तेऽन्ने कुक्षौ पीडा
२. जीर्णेऽन्ने पीडोपशमः
(च. चि. २८)४

मूत्रावृते वाते लिङ्गानि

१. मूत्राप्रवृत्तिः
२. वस्तिदेश आध्मानम्
(च. चि. २८)५

पुरीषावृते वाते लिङ्गानि

१. वर्चसोऽतिविबन्धः
२. पक्वाशये परिकर्तिका
३. स्नेहस्य शीघ्रं जरणम्
४. भुक्तेऽन्न आनाहः
५. अन्नेन पीडिते चिरात् सदुःखं शुष्कस्य शकृतः प्रवृत्तिः
६. श्रोणीरुक्
७. वंक्षणरुक्
८. पृष्ठरुक्
९. मारुतस्य विलोमता
१०. हृदयस्यास्वास्थ्यम्
(च. चि. २८)६

---

१ "समानेनावृतेऽपाने ग्रहणीपार्श्वहृद्गदाः। शूलं चामाशये" (च. चि. २८)

२ "शिरोग्रहः प्रतिश्यायो निःश्वासोच्छ्वाससंग्रहः। हृद्रोगो मुखशोषश्चाप्युदाने प्राणसंवृते।" (च. चि. २८)

३ "कर्मौजोबलवर्णानां नाशो मृत्युरथापि वा। उदानेनावृते प्राणे" (च. चि. २८)

४ "भुक्ते कुक्षौ च रुग्जीर्णे शाम्यत्यन्नावृतेऽनिले।" (च. चि. २८)

५ "मूत्राप्रवृत्तिराध्मानं बस्तौ मूत्रावृतेऽनिले।" (च. चि. २८)

६ "वर्चसोऽतिविबन्धोऽधो स्वे स्थाने परिकृन्तति। व्रजत्याशु जरां स्नेहो भुक्ते चानह्यते नरः। चिरात् पीडितमन्नेन दुःखं शुष्कं शकृत् सृजेत्। श्रोणीवंक्षणपृष्ठेषु रुग्विलोमश्च मारुतः। अस्वस्थं हृदयं चैव वर्चसा त्वावृतेऽनिले।" (च. चि. २८)

अन्योन्यावृतवातेषु लिङ्गानि

उदानावृतेऽपाने लिङ्गानि

१. छर्दिः
२. श्वासः

(च. चि. २८)[1]

अपानावृत उदाने लिङ्गानि

१. मोहः
२. अग्निमान्द्यम्
३. अतिसारः

(च. चि. २८)[2]

व्यानावृतेऽपाने लिङ्गानि

१. वमनम्
२. आध्मानम्
३. उदावर्तः
४. गुल्मरोगः
५. परिकर्तिका

(च. चि. २८)[3]

अपानावृते व्याने लिङ्गानि

१. पुरीषातिप्रवृत्तिः
२. मूत्रातिप्रवृत्तिः
३. रेतसोऽतिप्रवृत्तिः

(च. चि. २८)[4]

समानावृते व्याने लिङ्गानि

१. मूर्च्छा
२. तन्द्रा
३. प्रलापः
४. अङ्गसादः
५. अग्निमांद्यम्
६. ओजःक्षयः
७. बलक्षयः

(च. चि. २८)[5]

उदानावृते व्याने लिङ्गानि

१. स्तब्धता
२. अल्पाग्निता
३. अस्वेदः
४. चेष्टाहानिः
५. निमीलनम्

(च. चि. २८)[6]

---

१ "ऊर्ध्वगेनावृतेऽपाने छर्दिश्वासादयो गदाः।' (च.चि. २८)

२ "मोहोऽल्पोऽग्निरतीसारः ऊर्ध्वगेऽपानसंवृते।" (च. चि. २८)

३ "वम्याध्मानमुदावर्तगुल्मार्तिपरिकर्तिकाः। लिङ्गं व्यानावृतेऽपाने॥" (च. चि. २८)

४ "अपानेनावृते व्याने भवेद्विण्मूत्ररेतसाम्। अतिप्रवृत्तिः" (च. चि. २८)

५ 'मूर्च्छा तन्द्रा प्रलापोऽङ्गसादोऽग्न्योजोबलक्षयः। समानेनावृते व्याने" (च. चि. २८)

६ "स्तब्धताऽल्पाग्निताऽस्वेदश्चेष्टाहानिर्निमीलनम्। उदानेनावृते व्याने" (च. चि. २८)

वात-पित्त-कफ-प्रकृतीनां लक्षणानि

वातप्रकृतिः (वातलः)

१. रूक्षशरीरः
२. अपचितशरीरः (कृशः, सु.)
३. अल्पशरीरः
४. प्रतत(सतत)रूक्षस्वरः
५. प्रततक्षामस्वरः
६. प्रततभि(स)न्नस्वरः
७. प्रततसक्तस्वरः
८. प्रततजर्जरस्वरः
९. जागरूकः (अल्पनिद्रः)
१०. लघु(क्षिप्र)गतिः (द्रुतगतिः, सु)
११. चपल(अस्थिर)गतिः
१२. लघुचेष्टः
१३. चपलचेष्टः
१४. लघ्वाहारः
१५. चपलाहारः
१६. लघुव्याहारः (लघुवाक्यः)
१७. चपलव्याहारः
१८. अनवस्थित(अस्थिर)सन्धिः
१९. अनवस्थिताक्षिः
२०. अनवस्थितभ्रूः
२१. अनवस्थितहनुः
२२. अनवस्थितौष्ठः
२३. अनवस्थितजिह्वः
२४. अनवस्थितशिराः
२५. अनवस्थितस्कन्धः
२६. अनवस्थितपाणिः
२७. अनवस्थितपादः
२८. बहुप्रलापः
२९. बहुकण्डरः
३०. बहुसिराप्रतानः
३१. शीघ्रसमारम्भः
३२. शीघ्रक्षोभः
३३. शीघ्रव्याधिः
३४. शीघ्रविकारः
३५. शीघ्ररागः
३६. शीघ्रविरागः
३७. श्रुतग्राही
३८. अल्पस्मृतिः
३९. शीतासहिष्णुः
(शीतद्वेषी; सु.)
४०. प्रतत(सतत)शीतः
४१. प्रततोद्वेपकः
४२. प्रततस्तम्भः
४३. परुषकेशः
४४. परुषश्मश्रुः
४५ परुषरोमः
४६. परुषनखः
४७. परुषदर्शनः
४८. परुषवदनः
४९. परुषपाणिः
५०. परुषपादः
५१. स्फुटिताङ्गावयवः
५२. अल्पबलः
५३. सततसन्धिशब्दगामी
५४. अल्पायुः
५५. अल्पापत्यः
५६. अल्पसाधनः
५७. अल्पधनः

(च. वि. ८)१

५८. दुर्भगः
५९. स्तेनः
६०. मत्सरी
६१. अनार्यः (असत्पुरुषः)
६२. गन्धर्वचित्तः
६३. स्फुटितकरः
६४. स्फुटितचरणः
६५. अल्पश्मश्रुः
६६. अल्पनखः
६७. अल्पकेशः
६८. रूक्षश्मश्रुः
६९. रूक्षनखः
७०. रूक्षकेशः
७१. क्राथी
७२. दन्तखादी
७३. नखखादी
७४. अधृतिः
७५. अदृढसौहृदः
(चलसौहार्दः अ. सं.)
७६. कृतघ्नः
७७. परुषः
७८. धमनीततः
७९. प्रलापी (बहुभाषी, अ.सं.)
८०. अटनः
८१. अनवस्थितचित्तः
८२. स्वप्ने आकाशगमनशीलः
८३. अव्यवस्थितमतिः
८४. चलदृष्टिः
८५. अल्परत्नधनसंचयः
८६. अल्पमित्रः
८७. किंचिदनबद्धप्रलपनशीलः
८८. अजप्रकृतिः
८९. गोमायुप्रकृतिः
९०. शशप्रकृतिः

९१. आखुप्रकृतिः
९२. उष्ट्रप्रकृतिः
९३. गृध्रप्रकृतिः
९४. काकप्रकृतिः
९५. खरप्रकृतिः
(सु. शा. ४)२
९६. तनु-रूक्ष-स्तब्धाऽल्पाङ्गः
९७. तनु-रूक्ष-स्तब्धाऽल्पनखः
९८. तनु-रूक्ष-स्तब्धाऽल्पदन्तः
९९. तनु-रूक्ष-स्तब्धाऽल्परोमः
१००. तनु-रूक्ष-स्तब्धाऽल्प-नेत्रः
१०१. तनु-रूक्ष-स्तब्धाऽल्प-स्वरः
१०२. उद्बद्ध(ह्रस्व-कठिन)पिण्डिकः
१०३. शीघ्रग्रहणशीलः
१०४. शीघ्रविस्मरणः
१०५. चलधृतिः
१०६. चलमतिः
१०७. चलस्वभावः
१०८. अजितेन्द्रियः
१०९. प्रियेतिहासः
११०. प्रियहासः
१११. प्रियविलासः
११२. प्रियकलहः
११३. मृगयाप्रियः
११४. प्रियोद्यानः
११५. प्रिययात्रः
११६. स्निग्ध-उष्ण-मधुराम्ल-लवणान्नपानकाङ्क्षः
११७. स्निग्ध-उष्ण-मधुर-अम्ल-लवणोपशयः
११८. अल्पनिद्रः
११९. बहुभुक्
१२०. नास्तिकः
(अ. हृ. शा. ३)३
(अ. हृ. शा. ८)४

---

१ "वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविशदः। तस्य रौक्ष्याद्वातला रूक्षापचिताल्पशरीराः प्रततरूक्षक्षामस(न्न)सक्तजर्जरस्वरा जागरूकाश्च भवन्ति, लघुत्वाल्लघुचपलगतिचेष्टाहारव्याहाराः, चलत्वादनवस्थितसन्ध्यक्षिभ्रूहन्वोष्ठजिह्वाशिरःस्कन्धपाणिपादाः, बहुत्वाद्बहुप्रलापकण्डराशिराप्रतानाः, शीघ्रत्वाच्छीघ्रसमारम्भक्षोभविकाराः, शीघ्रत्रासरागविरागाः श्रुतग्राहिणोऽल्पस्मृतयश्च, शैत्याच्छीतासहिष्णवः प्रततशीतकोद्वेपकस्तम्भाः, पारुष्यात् परुषकेशश्मश्रुरोमनखदशनवदनपाणिपादाः, वैशद्यात् स्फुटिताङ्गावयवाः सततसन्धिशब्दगामिनश्च भवन्ति; त एवंगुणयोगाद्वातलाः प्रायेणाल्पबलाश्चाल्पायुषश्चाल्पापत्याश्चाल्पसाधनाश्चाल्पधनाश्च भवन्ति।" (च. वि. ८)

२ "तत्र वातप्रकृतिः प्रजागरूकः शीतद्वेषी दुर्भगः स्तेनो मत्सर्यनार्यो गान्धर्वचित्तः स्फुटितकरचरणोऽल्परूक्षश्मश्रुनखकेशः क्राथी दन्तखादी च भवति॥"

अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी॥
द्रुतगतिरटनोऽनवस्थितात्मा वियति च गच्छति संभ्रमेण सुप्तः॥
अव्यवस्थितमतिश्चलदृष्टिर्मन्दरत्नधनसंचयमित्रः।
किंचिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेष मनुष्यः॥

वातिकाश्चाजगोमायुशशाखूष्ट्रशुनां तथा। गृध्रकाकखरादीनामनूकैः कीर्तिता नराः॥ (सु. शा. ४)

३ "प्रायोऽत एव पवनाध्युषिता मनुष्या दोषात्मकाः स्फुटितधूसरकेशगात्राः। शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टासौहार्ददृष्टिगतयोऽतिबहुप्रलापाः॥ अल्पवित्तबलजीवितनिद्राः सन्नसक्तचलजर्जरवाचः। नास्तिका बहुभुजः सविलासा गीतहासमृगयाकलिलोलाः॥ मधुराम्लपटूष्णसात्म्यकाङ्क्षाः कृशदीर्घाकृतयः सशब्दयाताः। न दृढा न जितेन्द्रिया न चार्या न च कान्तादयिता बहुप्रजा वा॥ नेत्राणि चैषां खरधूसराणि वृत्तान्यचारूणि मृतोपमानि। उन्मीलितानीव भवन्ति सुप्ते शैलद्रुमांस्ते गगनं च यान्ति॥ अधन्या मत्सराध्माताः स्तेनाः प्रोद्बद्धपिण्डिकाः। श्वशृगालोष्ट्रगृध्राखुकाकानूकाश्च वातिकाः॥ (अ.हृ.शा. ३)

४ अथ स्वदोषगुणानुरोधाद्वातप्रकृतिस्तनुरूक्षस्तब्धाल्पाङ्गदन्तनखरोमनेत्रस्वरः शीतद्विडुद्बद्धपिण्डिकः सशब्दपर्वगामी शीघ्रारम्भक्षोभग्रहणविस्मरणश्चलधृतिमतिदृष्टिस्वभावसौहार्दः स्तेनोऽनार्यो मत्सर्यजितेन्द्रियः प्रियगान्धर्वेतिहासविलासकलहमृगयोद्यानयात्रः। स्निग्धोष्णमधुराम्ललवणान्नपानकाङ्क्षोपशयश्च भवति। अल्पवित्तबलजीवितनिद्रः क्षामव्यग्रधमनिसंततगात्रः। दुर्भगोऽतिबहुभुग्बहुभाषी नास्तिकः स्फुटितकेशकराङ्घ्रिः॥ किंचिदुन्मिषितदुर्मुखसुप्तः स्वपति क्रथति खादति दन्तान्। शुष्करूक्षविषमासु सरित्सु व्योम्निशैलशिखरेषु च याति॥

पित्तप्रकृतिः (पित्तलः)

१. उष्णासहः (उष्णद्वेषी, सु.)

२. उष्णमुखः

३ शुष्कगात्रः

४. सुकुमार(मृदु)गात्रः

५. अवदात(पीताभ)गात्रः
(पीताङ्गः, सु)

६. प्रभूतपिप्लुः

७. प्रभूतव्यङ्गः

८. प्रभूततिलः

९. प्रभूतपिडकः

१०. अधिकक्षुधः

११. अधिकपिपासः

१२. क्षिप्रवलिः (वलिजुष्टः, सु.)

१३, क्षिप्रपलितः (पलितजुष्टः,सु.)

१४. क्षिप्रखालित्यः
(खालित्यजुष्टः, सु.)

१५. मृदुश्मश्रुलोमकेशः

१६. अल्पश्मश्रुलोमकेशः

१७. कपिलश्मश्रुलोमकेशः

१८. तीक्ष्णपराक्रमः

१९. तीक्ष्णाग्निः

२०. प्रभूताशनः

२१. प्रभूतपानः

२२. क्लेशासहिष्णुः

२३. दन्दशूकः (पुनःपुनर्भक्षणशीलः)

२४. शिथिलसन्धिबन्धः

२५. शिथिलमांसः

२६. मृदुसन्धिबन्धः

२७. मृदुमांसः

२८. प्रभूतसृष्टस्वेदः
(स्वेदनः, सु.)

२९. प्रभूतसृष्टमूत्रः

३०. प्रभूतसृष्टपुरीषः

३१ प्रभूतपूतिकक्षागन्धः

३२. प्रभूतपूत्यास्यगन्धः

३३. प्रभूतपूतिशिरोगन्धः

३४. प्रभूतपूतिशरीरगन्धः

३५. अल्पशुक्रः

३६. अल्पव्यवायः

३७. अल्पापत्यः

३८. मध्यबलः

३९. मध्यायुः

४०. मध्यज्ञानः

४१. मध्यविज्ञानः

४२. मध्यवित्तोपकरणः
(च. वि. ८)१

४३. दुर्गन्धः

४४. शिथिलाङ्गः

४५. ताम्रनखः

४६. ताम्रनयनः

४७. ताम्रतालुः

४८. ताम्रजिह्वः

४९. ताम्रौष्ठः

५०. ताम्रपाणितलः

५१. ताम्रपादतलः

५२. दुर्भगः

५३. क्षिप्रकोपः

५४. क्षिप्रप्रसादः

५५. मेधावी

५६. निपुणमतिः

५७. विगृह्य वक्ता

५८. तेजस्वी

५९ समितिषु दुर्निवारवीर्यः

६०. स्वप्ने कनकदर्शनशीलः

६१. स्वप्ने पलाश(पुष्प)-
दर्शनशीलः

६२. स्वप्ने कर्णिकारपुष्प-
दर्शनशीलः

६३. स्वप्ने हुताशदर्शनशीलः

६४. स्वप्ने विद्युद्दर्शनशीलः

६५. स्वप्ने उल्कादर्शनशीलः

६६. भयादप्रणमनशीलः

६७. अनतेषु क्रूरः

६८. प्रणतेषु सान्त्वनदानरुचिः

६९. सदाव्यथितमुखः

७०. सदाव्यथितगतिः
(सु शा. ४)२

७१. भुजंगस्वभावः

७२. उलूकस्वभावः

७३. गन्धर्वस्वभावः

७४. यक्षस्वभावः

७५. मार्जारस्वभावः

७६. वानरस्वभावः

७७. व्याघ्रस्वभावः

७८. ऋक्षस्वभावः

७९. नकुलस्वभावः (सु. शा. ४)२
८०. शूरः
८१. अभिमानी
८२. स्वादु-तिक्त-कषाय-शीताभिलाषः
८३. स्वादु-तिक्त-कषाय-शीतोपशयः
८४. प्रियमाल्यः
८५. प्रियविलेपनः
८६. प्रियमण्डनः
८७. सुचरितः
८८. शुचिः
८९. आश्रितवत्सलः
९०. विभवान्वितः
९१. साहसान्वितः
९२. बुद्धयान्वितः
९३. बलान्वितः
९४. द्विषतामपि भीषु गतिः
९५. प्रभूतेर्ष्यः
९६. स्वप्ने दिग्दाहदर्शनशीलः
९७. स्वप्ने सूर्यदर्शनशीलः
९८. नारीप्रियः
९९. नीलिकः
१००. तनुनेत्रः
१०१. पिङ्गलनेत्रः
१०२. चलदृष्टिः
१०३. तन्वल्पपक्ष्मनेत्रः
१०४. शीतप्रियनेत्रः
१०५. क्रोधमद्यरविकिरणैः रागरञ्जनशीलनेत्रः
१०६. पण्डितः
१०७. क्लेशभीरुः
(अ. हृ. शा. ३) ३
(अ. सं. शा. ८)४

---

१ पित्तमुष्णं द्रवं विस्रमम्लं कटुकं च । तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहा उष्णमुखाः सुकुमारावदातगात्राः प्रभूतपिप्लुव्यङ्गतिलपिडकाः क्षुत्पिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः प्रायो मृद्वल्पकपिलश्मश्रुलोमकेशाः तैक्ष्ण्यात्तीक्ष्णपराक्रमाः तीक्ष्णाग्नयः प्रभूताशनपानाः क्लेशासहिष्णवो, दन्दशूकाः द्रवत्वाच्छिथिलमृदुसन्धिमांसाः प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च; विस्रत्वात् प्रभूतपूतिकक्षास्यशिरः शरीरगन्धाः कट्वम्लत्वादल्पशुक्रव्यवायापत्याः, त एवं गुणयोगात् पित्तला मध्यबला मध्यायुषो मध्यज्ञानविज्ञानवित्तोपकरणवन्तश्च भवन्ति ॥ (च. वि. ८)

२ पित्तप्रकृतिस्तु स्वेदनो दुर्गन्धः पीतशिथिलाङ्गस्ताम्रनखनयनतालुजिह्वौष्ठपाणिपादतलो दुर्भगो वलीपलितखालित्यजुष्टो बहुभुगुष्णद्वेषी क्षिप्रकोपप्रसादो मध्यबलो मध्यायुश्च भवति ॥ मेधावी निपुणमतिर्विगृह्यवक्ता तेजस्वी समितिषु दुर्निवारवीर्यः ॥ सुप्तः सन् कनकपलाशकर्णिकारान् संपश्येदपि च हुताशविद्युदुल्काः ॥ न भयात् प्रणमेदनतेष्वमृदुः प्रणतेष्वपि सान्त्वनदानरुचिः ॥ भवतीह सदा व्यथितास्यगतिः स भवेदिह पित्तकृतप्रकृतिः ॥ भुजङ्गोलूकगन्धर्वयक्षमार्जारवानरैः । व्याघ्रर्क्षनकुलानूकैः पैत्तिकास्तु नराः स्मृताः ॥' (सु. शा. ४) '

३ "पित्तं वह्निर्वह्निजं वा यदस्मात्पित्तोद्रिक्तस्तीक्ष्णतृष्णाबुभुक्षः । गौरोष्णाङ्गस्ताम्रहस्ताङ्घ्रिवक्त्रः शूरो मानी पिङ्गकेशोऽल्परोमा ॥ दयितमाल्यविलेपनमण्डनः सुचरितः शुचिराश्रितवत्सलः । विभवसाहसबुद्धिबलान्वितो भवति भीषु गतिर्द्विषतामपि ॥ मेधावी प्रशिथिलसन्धिबन्धमांसो नारीणामनभिमतोऽल्पशुक्रकामः । आवासः पलिततरङ्गनीलिकानां भुङ्क्तेऽन्नं मधुरकषायतिक्तशीतम् । घर्मद्वेषी स्वेदनः पूतिगन्धिर्भूर्युच्चारक्रोधपानाशनेर्ष्यः । सुप्तः पश्येत्कर्णिकारान्पलाशान् दिग्दाहोल्काविद्युदर्कानलांश्च ॥ तनूनि पिङ्गानि चलानि चैषां तन्वल्पपक्ष्माणि हिमप्रियाणि । क्रोधेन मद्येन रवेश्च भासा रागं व्रजन्त्याशु विलोचनानि ॥ मध्यायुषो मध्यबलाः पण्डिताः क्लेशभीरवः । व्याघ्रर्क्षकपिमार्जारयक्षानूकाश्च पैत्तिकाः (अ. हृ. शा. ३)

४ पित्तप्रकृतिरुष्णगौरवर्णताम्रनखनयनजिह्वौष्ठपाणिपादतलः शिथिलसन्धिबन्धमांसः करभकपिलविरलमृदुकेशरोमा मध्यबलायुरल्पशुक्रव्यवायापत्यः शूरोऽभिमानी शीघ्रवलीखलतिपलितपिप्लुव्यङ्गक्षुत्पिपासो मेधावी दुर्भगः स्वादुतिक्तकषायशीताभिलाषोपशयश्च भवति ॥

दयितमाल्यविलेपनमण्डनः सुचरितः शुचिराश्रितवत्सलः ॥
विभवसाहसबुद्धिबलान्वितो भवति भीषु गतिर्द्विषतामपि ॥
घर्मद्वेषी स्वेदनः पूतिगन्धिर्भूर्युच्चारक्रोधपानाशनेर्ष्यः ।
सुप्तः पश्येत् कर्णिकारान् पलाशान् दिग्दाहोल्काविद्युदर्कानलांश्च ॥ (अ. सं. शा. ८)

श्लेष्मप्रकृतिः (श्लेष्मलः)

१. स्निग्धाङ्गः
२. श्लक्ष्णाङ्गः
३. दृष्टिसुखगात्रः
४. (प्रियदर्शनः सु.)
५. सुकुमारगात्रः
६. अवदात(सित)गात्रः
७. प्रभूतशुक्रः
८. प्रभूतव्यवायः
९. प्रभूतापत्यः
१०. सारशरीरः
११. संहतशरीरः
१२. स्थिरशरीरः
१३. उपचितसर्वाङ्गः
१४. परिपूर्णसर्वाङ्गः
१५. मन्द(अल्प)चेष्टः
१६. मन्दाहारः
१७. मन्दव्याहारः (मन्दवाक्)
१८. अशीघ्रारम्भः
१९. अशीघ्रक्षोभः
२०. अशीघ्रविकारः
२१. सारगतिः
२२. अधिष्ठितगतिः
२३. अवस्थितगतिः
(मन्दगतिः)
२४. अल्पक्षुत्
२५. अल्पतृष्णः
२६. अल्पसंतापः
२७. अल्पस्वेदः
२८. सुश्लिष्टसार-
संधिबन्धनः
२९. प्रसन्ननयनः
३०. प्रसन्नवर्णः
३१. प्रसन्नमुखः
३२. प्रसन्नस्वरः
३३ स्निग्धवर्णः
३४. स्निग्धस्वरः
३५. बलवान्
३६. वसु(धन)मान्
३७. विद्यवान् (विपश्चित्,
अ. सं.)
३८. ओजस्वी,
३९. शान्तः
४०. आयुष्मान्
(च. वि. ८)
४१. दूर्वा इन्दीवर-निस्त्रिंश-
आर्द्रारिष्टक-शरकाण्डा-
नामन्यतमवर्णः
४२. सुभगः
४३. सम-सुविभक्त-स्निग्धस्थिर-सुकुमार-
श्लिष्टमांससंधिबन्धः
४४. मधुरप्रियः
४५. चारुगात्रः
४६. कृतज्ञः
४७. धृतिमान्
४८. सहिष्णुः
४९. अलोलुपः
५०. चिरग्राही
५१. दृढवैरः
५२. शुक्लाक्षः
५३. स्थिरकेशः
५४. कुटिलकेशः
५५. अलि(भ्रमर)नीलकेशः
५६. जलदघोषः
५७. मृदङ्गघोषः
५८. सिंहघोषः
५९. स्वप्ने सकमल-
हंस-चक्रवाक-
मनोज्ञजलाशयदर्शी
६०. रक्तान्तनेत्रः
६१. सुविभक्तगात्रः
६२. स्निग्धच्छविः
६३. सत्वगुणबहुलः
६४. क्लेशक्षमः
६५. गुरूणां मानयिता
६६. दृढशास्त्रमतिः
६७. स्थिरमित्रः
६८. स्थिरधनः
६९. परिगण्य चिरात् बहु
च प्रदानशीलः
७०. परिनिश्चितवाक्यपदः
७१. ब्रह्मस्वभावः
७२. इन्द्रस्वभावः
७३. वरुणस्वभावः
७४. सिंहस्वभावः
७५. अश्वस्वभावः
७६. गजस्वभावः
७७. गोवृषस्वभावः
७८. तार्क्ष्यस्वभावः
७९. हंसस्वभावः
(सु. शा. ४)

६७. परिपूर्णगात्रः
६८. महाललाटः
६९. महोरुः
७०. महाबाहुः
७१. व्यक्तसिताऽसितनेत्रः
७२. प्रसन्ननेत्रः
७३. आयतनेत्रः
७४. विशालनेत्रः
७५. पक्ष्मलनेत्रः
७६. क्षुत्पिपासोष्णसहिष्णुः
७७. चिरशोषमाल्यानुलेपनः
७८. दृढप्रच्छन्नवैरः
७९. पेशलः
८०. सत्यवादी
८१. बाल्येऽप्यरोदनः
८२. कटु-तिक्त-कषाय-
उष्ण-रूक्षेच्छः
८३. कटु-तिक्त-कषाय-
उष्ण-रूक्षोपशयः
८४. अल्पक्रोधः
८५. अल्पेच्छः
८६. अल्पपानाशनः
८७. दीर्घदर्शी
८८. वदान्यः
८९. श्रद्धावान्
९०. गम्भीरः
९१. स्थूललक्षः
९२. आर्यः
९३. निद्रालुः
९४. दीर्घसूत्री
९५. कृतज्ञः
९६. ऋजुः
९७. सलज्जः
(अ. सं. शा. ८)२
९८. सौम्यः
९९. गूढसंध्यस्थिमांसः
१००. सात्विकः
१०१. सत्यसंधः
१०२. प्रियंगुवर्णः
१०३. गोरोचनावर्णः
१०४. प्रलम्ब(दीर्घ)बाहुः
१०५. पृथुपीनवक्षाः
१०६. बहुमूत्रः
१०७. धर्मात्मा
१०८. अनिष्ठुरवाक्
१०९. समदगजेन्द्रतुल्यगतिः
११०. समुद्रघोषः
१११. अभियोगवान्
११२. विनीतः
११३. तिक्तकषायकटूष्ण-
रूक्षाल्पभुगपि बलवान्
११४. सुस्निग्धनेत्रः
११५. दृढस्वभावः
११६. गोवृषस्वभावः
(अ. हृ. शा. ३)४

---

१ श्लेष्मा हि स्निग्ध-श्लक्ष्ण-मृदु-मधुर-सार-सान्द्र-मन्द-स्तिमित गुरु-शीत-विज्जलाच्छः। तस्य स्नेहाच्छ्लेष्मलाः स्निग्धाङ्गाः, श्लक्ष्णत्वाच्छ्लक्ष्णाङ्गाः, मृदुत्वाद्दृष्टिसुखसुकुमारावदातगात्राः, माधुर्यात् प्रभूतशुक्रव्यवायापत्याः, सारत्वात् सारसंहतस्थिरशरीराः, सान्द्रत्वादुपचितपरिपूर्णसर्वाङ्गाः, मन्दत्वान्मन्दचेष्टाहारव्याहाराः, स्तैमित्यादशीघ्रारम्भक्षोभविकाराः, गुरुत्वात् साराधिष्ठितावस्थितगतयः, शैत्यादल्पक्षुत्तृष्णासंतापस्वेददोषाः, विज्जलत्वात् सुश्लिष्टसारसन्धिबन्धनाः, तथाऽच्छत्वात् प्रसन्नदर्शनाननाः प्रसन्नस्निग्धवर्णस्वराश्च भवन्ति। त एवंगुणयोगाच्छ्लेष्मला बलवन्तो वसुमन्तो विद्यावन्त ओजस्विनः शान्ता आयुष्मन्तश्च भवन्ति। (च. वि. ८)

२ श्लेष्मप्रकृतिस्तु दूर्वेन्दीवरनिस्त्रिंशार्द्ररिष्टकशरकाण्डानामन्यतमवर्णः सुभगः प्रियदर्शनो मधुरप्रियः कृतज्ञो धृतिमान् सहिष्णुरलोलुपो बलवांश्चिरग्राही दृढवैरश्च भवति॥ शुक्लाक्षः स्थिरकुटिलालिनीलकेशो लक्ष्मीवान् जलदमृदङ्गसिंहघोषः॥ सुप्तः सन् सकमलहंसचक्रवाकान् संपश्येदपि च जलाशयान् मनोज्ञान्॥ रक्तान्तनेत्रः सुविभक्तगात्रः स्निग्धच्छविः सत्त्वगुणोपपन्नः। क्लेशक्षमो मानयिता गुरूणां ज्ञेयो बलासप्रकृतिर्मनुष्यः॥ दृढशास्त्रमतिः स्थिरमित्रधनः परिगण्य चिरात् प्रददाति बहु। परिनिश्चितवाक्यपदः सततं गुरुमानकरश्च भवेत् स सदा॥ ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः॥ तार्क्ष्यहंससमानूकाः श्लेष्मप्रकृतयो नराः॥ (सु. शा. ४)

३ "कफप्रकृतिस्तु दूर्वेन्दीवरशरकाण्डान्यतमवर्णः समसुविभक्तस्निग्धस्थिरसुकुमारश्लिष्टमांससन्धिबन्धः परिपूर्णचारुगात्रो महाललाटोरुबाहुर्व्यक्तसितासितप्रसन्नायतविशालपक्ष्मलाक्षः सिंहमृदंगघनघोषः क्षुत्पिपासोष्णसहिष्णुर्बह्वोजोबलशुक्रव्यवायापत्यस्थिरशोषमाल्यानुलेपनो दृढप्रच्छन्नवैरः पेशलः सत्यवादी स्मृतिमान् धृतिमानलोलुपो बाल्येऽप्यरोदनः कटुतिक्तकषायोष्णरूक्षेच्छोपशयश्च भवति ॥
(अ.सं.शा.८)

४ "श्लेष्मा सोमः श्लेष्मलस्तेन सौम्यो गूढस्निग्धश्लिष्टसन्ध्यस्थिमांसः। क्षुत्तृड्दुःखक्लेशधर्मैरतप्तो बुद्ध्या युक्तः सात्त्विकः सत्यसन्धः॥ प्रियङ्गुदूर्वाशरकाण्डशस्त्रगोरोचनापद्मसुवर्णवर्णः। प्रलम्बबाहुः पृथुपीनवक्षा महाललाटो घननीलकेशः॥ मृदङ्गः समसुविभक्तचारुदेहो बह्वोजोरतिरसशुक्रपुत्रभृत्यः। धर्मात्मा वदति न निष्ठुरं च जातु प्रच्छन्नं वहति दृढं चिरं च वैरम् ॥ समदद्विरदेन्द्रतुल्ययातो जलदाम्भोधिमृदङ्गसिंहघोषः। स्मृतिमानभियोगवान् विनीतो न च बाल्येऽप्यतिरोदनो न लोलः॥ तिक्तं कषायं कटुकोष्णरूक्षमल्पं स भुंक्ते बलवांस्तथाऽपि। रक्तान्तसुस्निग्धविशालदीर्घसुव्यक्तशुक्लासितपक्ष्मलाक्षः॥ अल्पव्याहारक्रोधपानाशनेहः प्राज्यायुर्वित्तो दीर्घदर्शी वदान्यः। श्राद्धो गम्भीरः स्थूललक्षः क्षमावानार्यो निद्रालुर्दीर्घसूत्रः कृतज्ञः॥ ऋजुर्विपश्चित्सुभगः सलज्जो भक्तो गुरूणां स्थिरसौहृदश्च। स्वप्ने सपद्मान्सविहङ्गमालांस्तोयाशयान् पश्यति तोयदांश्च॥ ब्रह्मरुद्रेन्द्रवरुणतार्क्ष्यहंसगजाधिपैः। श्लेष्मप्रकृतयस्तुल्यास्तथा सिंहाश्वगोवृषैः॥"
(अ.हृ.शा.३)

प्रकुपितवातकर्माणि

१. स्रंसः
२. व्यासः
३. सङ्गः
४. भेदः
५. सादः
६. हर्षः
७. तर्षः (तृषादिकम्) (मधुकोश)
८. कम्पः
९. अवमर्दः (अङ्गमर्दः, अ. सं.)
१०. चालः
११. तोदः
१२. व्यथा
१३. चेष्टा
१४. खरत्वम्
१५. परुषत्वम्
१६. विशदत्वम्
१७. शुषिरत्वम्
१८. अरुणवर्णता
१९. कषायमुखत्वम्
२०. विरसमुखत्वम्
२१. शोषः
२२. शूलम्
२३. सुप्तिः (स्वापः, सु. सं.)
२४. संकोचः
२५. स्तम्भः
२६. खञ्जता (च. सू. २०)१
२७. कार्श्यम्
२८. वर्तः
२९. उद्वेष्टनम्
३०. दंशनम्
३१. भङ्गः (का.पृ.७२)
३२. आध्मानम्
३३. रौक्ष्यम्
३४. स्फुटनम्
३५. विमथनम्
३६. क्षोभः
३७. कण्ठध्वंसः
३८. श्रमकः
३९. विलपनम्
४०. कर्णनादः
४१. विषमपरिणतिः
४२. भ्रंशः
४३. दृष्टिप्रमोहः
४४. विस्पन्दनम्
४५. उद्घट्टनम्
४६. ग्लपनम्
४७. निद्रानाशः
४८. ताडनम्
४९. पीडनम्
५०. नामः
५१. उन्नामः
५२. विषादः
५३. भ्रमः
५४. परिपतनम्
५५. जृम्भणम्
५६. रोमहर्षः
५७. विक्षेपः
५८. आक्षेपः
५९. ग्रहणम्
६०. छेदनम्
६१. वेष्टनम्
६२. श्याववर्णः
६३. विश्लेषः (मधुकोशः)३
६४. व्यधः (अ.हृ.सू.१२)४
६५. पर्वसंकोचः
६६. पर्वस्तम्भः
६७. अस्थिभेदः
६८. पर्वभेदः
६९. प्रलापः
७०. पाणिग्रहः
७१. पृष्ठग्रहः
७२. शिरोग्रहः
७३. पाङ्गुल्यम्
७४. कुब्जत्वम्
७५. अङ्गशोषः
७६. गर्भनाशः
७७. शुक्रनाशः
७८. रजोनाशः
७९. शिरोहुण्डनम्
८०. नासाहुण्डनम्
८१. अक्षिहुण्डनम्
८२. जत्रुहुण्डनम्
८३. ग्रीवाहुण्डनम्
८४. मोहः (च. चि. २८,)५
८५. बलोपघातः
८६. वर्णोपघातः
८७. सुखोपघातः
८८. आयुरुपघातः
८९. मनोव्याहर्षः
९०. सर्वेन्द्रियोपघातः
९१. गर्भस्यातिकालधारणम्
९२. गर्भविकारः
९३. भयः
९४. शोकः
९५. दैन्यम्
९६. प्राणोपरोधः (च.सू.१२)६

---

१ "स्रंसव्यासव्यधसङ्गभेदसादहर्षतर्षकम्पावमर्दचालतोदव्यथाचेष्टादीनि, तथा खरपरुषविशदशुषिरारुणकषायविरसमुखत्वशूलसुप्तिसंकोचनस्तम्भखञ्जतादीनि वायोः कर्माणि।" (च. सू. २०)॥

२ "विशदारुणपारुष्यसुप्तिसंकोचवैरसम्। शूलतोदकषायत्वशोषियस्वरकम्पनम्॥ सादहर्षौ कार्श्यवर्तव्यासस्रंसनभेदनम्। उद्वेष्टनदंशनभङ्गाश्च शोषश्चानिलकर्म च।" (का. पृ. २९)

३ "आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्पप्रतोदाः। कण्ठध्वंसावसादौ श्रमकविलपनं स्रंसशूलप्रभेदाः। पारुष्यं कर्णनादो विषमपरिणतिभ्रंशदृष्टिप्रमोहाः। विस्पन्दोद्घट्टनानि ग्लपनमशयनं ताडनं पीडनं च॥ नामोन्नामौ विषादो भ्रमपरिपतनं जृम्भणं रोमहर्षो। विक्षेपाक्षेपशोषग्रहणशुषिरताश्छेदनं वेष्टनं च। वर्णः श्यावोऽरुणो वा तदपि च महती स्वापविश्लेषसङ्गाः। विद्यात् कर्माण्यमूनि प्रकुपितमरुतः स्यात् कषायो रसश्च॥" (मधुकोशव्याख्यायां पञ्चनिदानलक्षणे सुदान्तसेनवचनम्)

४ "स्रंसव्यासव्यधस्वापसादरुक्तोदभेदनम्।
सङ्गाङ्गभङ्गसंकोचवर्तहर्षणतर्षणम्॥
कम्पपारुष्यसौषिर्यशोषस्पन्दनवेष्टनम्।
स्तम्भः कषायरसता वर्णः श्यावोऽरुणोऽपि वा॥"
(अ. हृ. सू. १२.)

५ "संकोचः पर्वणां स्तम्भो भेदोऽस्थ्नां पर्वणामपि।
लोमहर्षः प्रलापश्च पाणिपृष्ठशिरोग्रहः॥
खाञ्ज्यपाङ्गुल्यकुब्जत्वं शोषोऽङ्गानामनिद्रता।
गर्भशुक्ररजोनाशः स्पन्दनं गात्रसुप्तता॥
शिरोनासाक्षिजत्रूणां ग्रीवायाश्चापि हुण्डनम्।
भेदस्तोदार्तिराक्षेपो मोहश्चायास एव च॥" (च. चि.२८)

६ कुपितस्तु खलु शरीरे शरीरं नानाविधैर्विकारैरुपतपति बलवर्णसुखायुषामुपघाताय, मनो व्याहर्षयति, सर्वेन्द्रियाण्युपहन्ति, विनिहन्ति गर्भान् विकृतिमापादयत्यतिकालं वा धारयति भयशोकमोहदैन्यातिप्रलापाञ्जनयति, प्राणांश्चोपरुणद्धि॥" (च. सू. १२)

प्रकुपितपित्तकर्माणि

१. दाहः
२. औष्ण्यम्
(ऊष्मा, अ. सं.)
३. पाकः
४. स्वेदः
५. क्लेदः
६. कोथः
(कोठः, का. सं.)
७. कण्डूः
८. स्रावः
९. रागः
१०. पूति (विस्र) गन्धः (यो.)
११. शुक्लारुणवर्जो वर्णः
१२. कटुरसः
१३. अम्लरसः
(च. सू. २०)१
१४. विस्फोटः
१५. अम्लकः
१५. धूमकः
१७ प्रलापः
१८. स्वेदस्रुतिः
१९. मूर्च्छा
२०. दौर्गन्ध्यम्
२१. दरणम्
२२. मदः
२३. विसरणम्
२४. अरतिः
२५. तृषा
२६. भ्रमः
२७. अतृप्तिः
२८. तमःप्रवेशः
२९. कटुरसता
३०. अम्लरसता
३१. तिक्तरसता
३२. पाण्डुरहितान्यवर्णता
३४. कथितत्वम्
(मधुकोशव्याख्यायां
सुदान्तसेनः)२

प्रकुपितश्लेष्मकर्माणि

१. श्वैत्यम्
२. शैत्यम्
३. कण्डूः
४. स्थैर्यम्
५. उत्सेधः
६. गौरवम्
७. स्नेहः
८. सुप्तिः
९. क्लेदः
१०. उपदेहः
(उपलेपः सु. सं.)
११. बन्धः
१२. माधुर्यम्
१३. चिरकारित्वम्
(च. सू. २०)३
१४. तृप्तिः
१५. तन्द्रा
१६. स्तैमित्यम्
१७. काठिन्यम्
१८. मलाधिक्यम्
२०. अपक्तिः
२१. प्रसेकः
२२. शोथः
२३. निद्राधिक्यम्
२४. लवणरसत्वम्
२५. मधुररसता
२६. आलस्यम्
(सुदान्तसेनः)४

---

१ "दाहौष्ण्यपाकस्वेदक्लेदकोथकण्डूस्रावरागा यथास्वं गन्धवर्णरसाभिनिर्वर्तनं चेति पित्तस्य कर्माणि।" (च. सू. २०) "यथास्वं गन्धः विस्रः वर्णः शुक्लारुणवर्जः रसौ कटुकाम्लौ।" (यो.)

२ "विस्फोटाम्लकधूमकाः प्रलपनं स्वेदस्रुतिर्मूर्च्छनं दौर्गन्ध्यं दरणं मदो विसरणं पाकोऽरतिस्तृड्भ्रमौ। ऊष्माऽतृप्तितमःप्रवेशदहनं कट्वम्लतिक्ता रसा वर्णः पाण्डुवेवर्जितः कथितता कर्माणि पित्तस्य वै॥" (मधुकोशव्याख्यायां पञ्चनिदानलक्षणे सुदान्तसेनः)।

३ "श्वैत्यशैत्यकण्डूस्थैर्योत्सेधगौरवस्नेहसुप्तिक्लेदोपदेहबन्धमाधुर्यचिरकारित्वादीनि श्लेष्मणः कर्माणि।" (च. सू. २०)

४ "तृप्तिस्तन्द्रा गुरुता स्तैमित्यं कठिनता मलाधिक्यम्। स्नेहोऽपक्त्युपलेपाः शैत्यं कण्डूः प्रसेकश्च। चिरकर्तृत्वं शोथो निद्राधिक्यं रसौ पटुस्वादू। वर्णः श्वेतोऽलसता कर्माणि कफस्य जानीयात्॥" (मधुकोशव्याख्यायां पञ्चनिदानलक्षणे सुदान्तसेनवचनम्)

वातपित्तकफानां वृद्धिहेतुः

[स्वयोनिवर्धनात्युपसेवनम् (सु. सू. १५, अ. सं. सू. १९)] [1,2,3]

वातपित्तकफानां सामान्यवृद्धिलक्षणम्

१ वातपित्तकफानां प्राकृतकर्मणः आधिक्यम् (च. सू. १८)[4]

२ स्वविपरीतगुणेषु द्रव्येषु रुचिः (अ. हृ. सू. ११)[5]

वातपित्तकफानां विशिष्टानि वृद्धिलक्षणानि

वातवृद्धिलक्षणानि	पित्तवृद्धिलक्षणानि	कफवृद्धिलक्षणानि
१. वाक्पारुष्यम्	१. पीतावभासता	१. शुक्लता
२. कार्श्यम्	२. संतापः (दाहः, अ. सं.)	२. शैत्यम्
३. कार्ष्ण्यम्	३. शीतकामित्वम्	३. स्थैर्यम्
४. गात्रस्फुरणम्	४. अल्पनिद्रता	४. गौरवम्
५. उष्णकामिता	५. मूर्च्छा	५. अवसादः (अङ्गावसादः; अ. सं.)
६. निद्रानाशः	६. बलहानिः	६. तन्द्रा
७. अल्पबलत्वम् (बलोपघातः; अ. सं.)	७. इन्द्रियदौर्बल्यम्	७. निद्रा
८. गाढवर्चस्त्वम् (सु. सू. १५)[6]	८. पीतविट्कता	८. सन्धिविश्लेषः (सु. सू. १५)[8]
	९. पीतमूत्रता	
	१०. पीतनेत्रत्वम् (सु. सू. १५)[7]	

---

१ "वृद्धिः पुनरेषां स्वयोनिवर्धनात्युपसेवनाद्भवति।" (सु. सू. १५)

२ "स्वं वृध्यै। प्रत्यात्मबीजानियतं भृशमाशु न जायते॥" (अ. सं. सू. १९)

३ "सर्वं द्रव्यं बाह्यमाभ्यन्तरेण तुल्यं सत् भृशमाशु च वृद्धये जायते। कुत इत्याह–प्रत्यात्मबीजनियतं प्रतिस्वरूपं नियतकारणत्वात्। तथा हि मांसमेव यथा मांसकारणं न तथाऽन्यत्।" (इन्दुः)।

४ "दोष-प्रकृतिविशेषं नियतं वृद्धिलक्षणम्" (व.सू.१८)

५ "कुर्वते हि रुचिं दोषा विपरीतसमानयोः। वृद्धाः क्षीणाश्च भूयिष्ठम्" (अ. हृ. सू. ११)

६ "वातवृद्धौ वाक्पारुष्यं कार्श्यं कार्ष्ण्यं गात्रस्फुरणमुष्णकामिता निद्रानाशोऽल्पबलत्वं गाढवर्चस्त्वं च।" (सु. सू. १५)

७ "पित्तवृद्धौ पीतावभासता संतापः शीतकामित्वमल्पनिद्रता मूर्च्छा बलहानिरिन्द्रियदौर्बल्यं पीतविण्मूत्रनेत्रत्वं च।" (सु. सू. १०)

८ "श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्यं गौरवमवसादस्तन्द्रा। निद्रा सन्धिविश्लेषश्च।" (सु. सू. १५)

वातपित्तकफानां विशिष्टानि वृद्धिलक्षणानि

वातवृद्धिलक्षणानि	पित्तवृद्धिलक्षणानि	कफवृद्धिलक्षणानि
९. गात्रकम्पः	११. ग्लानिः	९. स्थौल्यम्
१०. संज्ञानाशः	१२. ओजोविस्रंसः	१०. आलस्यम्
११. इन्द्रियोपघातः	१३. तिक्तास्यता	११. स्रोतःपिधानम्
१२. अस्थिशूलम्	१४. तृषा	१२. मूर्च्छा
१३. मज्जशोषः	१५. क्रोधः (अ.सं.सू.१९)२	१३. श्वासः
१४. मलसङ्गः		१४. कासः
१५. आध्मानम्		१५. प्रसेकः
१६. आटोपः		१६. हृल्लासः
१७. मोहः		१७. अग्निसादः (अ. सं. सू. १९)३
१८. दैन्यम्		
१९. भयम्		
२०. शोकः		
२१. प्रलापः (अ. सं. सू. १९)१		

---

१ "कार्श्यकार्ष्ण्यगात्रकम्पस्फुरणोष्णकामित्वासंज्ञानिद्रानाशबलेन्द्रियोपघातास्थिशूलमज्जाशोषमलसङ्गाध्मानाटोपमोहदैन्यभयशोकप्रलापादिभिर्वृद्धो वायुः पीडयति।" (अ. सं. सू. १९)

२ "पीतत्वग्लानीन्द्रियदौर्बल्यौजोविस्रंसशीताभिलाषदाहतिक्तास्यतातृण्मूर्च्छाल्पनिद्रताक्रोधादिभिः पित्तम् (वृद्धं पीडयति)। (अ. सं. सू. १९)

३ "श्वैत्यशैत्यस्थौल्यालस्यगौरवाङ्गसादस्रोतःपिधानमूर्च्छातन्द्रानिद्राश्वासकासप्रसेकहृल्लासाग्निसादसन्धिविश्लेषादिभिः श्लेष्मा (वृद्धः पीडयति)।" (अ. सं. सू. १९)

वातपित्तकफानां विशिष्टानि क्षयलक्षणानि

वातक्षयलिङ्गानि

१. मन्दचेष्टता
२. अल्पवाक्त्वम्
३. अप्रहर्षः
४. मूढसंज्ञता (सु. सू. १५)[1]
५. प्रसेकः
६. अरुचिः
७. हृल्लासः
८. अङ्गसादः
९. अग्निवैषम्यम्
(अ. सं. सू. १९)[2]
१०. श्लेष्मवृद्ध्युक्तरोगसंभवः
(अ. हृ. सू. ११)[3]

पित्तक्षयलिङ्गानि

१. मन्दोष्मता
२. मन्दाग्निता
३. निष्प्रभता (सु. सू. १५)[4]
४. स्तम्भः
५. शैत्यम्
६. अनियततोदः
७. अनियतदाहः
८. अरोचकः
९. अविपाकः
१०. अङ्गपारुष्यम्
११. कम्पः
१२. गौरवम्
१३. नखशुक्लता
१४. नयनशुक्लता
(अ. सं. सू. १९)[5]

कफक्षयलिङ्गानि

१. रूक्षता
२. अन्तर्दाहः
३. विशेषेणामाशयशून्यता
४. श्लेष्माशयशून्यता
५. सन्धिशैथिल्यम्
(श्लथसंधिता अ. सं.)
६. तृष्णा
७. दौर्बल्यम्
८. प्रजागरणम् (अनिद्रा.अ.सं.)
(सु. सू. १५)[6]
९. भ्रमः
१०. उद्वेष्टनम्
११. अङ्गमर्दः
१२. परिप्लो(प्लो)षः
१३. तोदः
१४. दाहः
१५. दवः
१६. स्फोटनम्
१७. वेपनम्
१८. धूमायनम्
१९. हृदयद्रवः (अ. सं. सू. १९)[7]

---

१ "वातक्षये मन्दचेष्टताऽल्पवाक्त्वमप्रहर्षो मूढसंज्ञता च ।" (सु. सू. १५)

२ "प्रसेकारुचिहृल्लाससंज्ञामोहाल्पवाक्चेष्टताप्रहर्षाङ्गसादाग्निवैषम्यादिभिः क्षीणो वायुः पीडयति ।" (अ.सं.सू. १९)

३ "लिङ्गं क्षीणेऽनिलेऽङ्गस्य सादोऽल्पं भाषितेहितम् । संज्ञामोहस्तथा श्लेष्मवृद्ध्युक्तामयसंभवः ॥" (अ. हृ. सू. ११)

४ "पित्तक्षये मन्दोष्माग्निता निष्प्रभता च" (सु. सू. १५)

५ "स्तम्भशैत्यानियततोददाहारोचकाविपाकाङ्गपारुष्यकम्पगौरवनखनयनशौक्ल्यादिभिः पित्तम् ॥" (अ. सं. सू. १९)

६ "श्लेष्मक्षये रूक्षताऽन्तर्दाह आमाशयेतरश्लेष्माशयशून्यता सन्धिशैथिल्यं तृष्णा दौर्बल्यं प्रजागरम् च ।" (सु.सू.१५)

७ "भ्रमोद्वेष्टनानिद्राङ्गमर्दपरिप्लोषतोददवदाहस्फोटनवेपनधूमायनसन्धिशैथिल्यहृदयद्रवश्लेष्माशयशून्यतादिभिः श्लेष्मा ।" (अ. सं. सू. १९)

दोषाणां विविधा गतिप्रकाराः

१ "क्षयः स्थानं च वृद्धिश्च दोषाणां त्रिविधा गतिः।" (च. सू. १७) "गतिः प्रकारोऽवस्था वा" (चक्र.)

२ "ऊर्ध्वं चाधश्च तिर्यक् च विज्ञेया त्रिविधाऽपरा" (च. सू. १७) "एषा गतिरूर्ध्वादिगमनरूपाऽवस्था प्रायेण वृद्धावस्थायामेव। (गं.)।

३ "त्रिविधा चापरा कोष्ठशाखामर्मास्थिसन्धिषु।" (च.सू. १७) "तत्र शाखा रक्तादयो धातवस्त्वक् च, स बाह्यो रोगमार्गः। मर्माणि पुनर्बस्तिहृदयमूर्धादीनि, अस्थिसन्धयोऽस्थिसंयोगास्तत्रोपनिबद्धाश्च स्नायुकण्डराः स मध्यमो रोगमार्गः। कोष्ठः पुनरुच्यते महास्रोतः शरीरमध्यं महानिम्नमामपक्वाशयश्चेति पर्यायशब्दैस्तन्त्रे, स रोगमार्ग आभ्यन्तरः" (च. सू. ११)

४ "चयप्रकोपप्रशमाः पित्तादीनां यथाक्रमम्। भवन्त्येकैकशः षट्सु कालेष्वभ्रागमादिषु। गतिः कालकृता चैषा चयाद्या पुनरुच्यते॥" (च.सू.१७)

५ "चयो वृद्धिः स्वधाम्न्येव कोपस्तून्मार्गगामिता। स्वस्थानस्थस्य समता विकारासंभवः शमः।" (अ.हृ.सू.१२)

६ "गतिश्च द्विविधा दृष्टा प्राकृती वैकृती तथा। पित्तादेवोष्मणः पक्तिर्नराणामुपजायते। तच्च पित्तं प्रकुपितं विकारान्कुरुते बहून्॥ प्राकृतस्तु बलं श्लेष्मा विकृतो मल उच्यते। स चैवोजः स्मृतः काये स च पाप्मोपदिश्यते॥ सर्वा हि चेष्टा वातेन स प्राणः प्राणिनां स्मृतः। तेनैव रोगा जायन्ते तेन चैवोपरुध्यते॥" (च. सू. १७) "उक्तरूपा तु पित्तादीनां गतिः प्राकृती वैकृती चेति द्विधोच्यते। पित्तस्य वर्षादिषु त्रिषु चयाद्या गतिः प्राकृती, वसन्तादिषु त्रिषु वैकृती। कफस्य हेमन्तादिषु त्रिषु चयाद्या गतिः प्राकृती, प्रावृडादिषु वैकृती। वायोर्ग्रीष्मादिषु त्रिषु चयाद्या गतिः प्राकृती, शरदादिषु त्रिषु वैकृतीति। उक्तं च "वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्। (च. चि. ३) इति तथेत्यादि * * प्राकृती स्वास्थ्यावस्था। वैकृती त्वातुर्यावस्था इति द्विविधा पित्तादीनां गतिरित्यर्थः तद्द्वयमुदाहरति पित्तादेवेत्यादि।" (गं.)।

रोगानारभमाणानां वात-पित्त-कफानां पञ्चावस्थाः

१. संचयः २. प्रकोपः ३. प्रसरः ४. स्थानसंश्रयः ५. अभिव्यक्तिः

संचयावस्थायां दोषाणां लिङ्गानि (अ.सं.सू.२०)१

वातलिङ्गम्	पित्तलिङ्गम्	कफलिङ्गम्	त्रयाणां सामान्यलिङ्गम्
१. स्तब्धकोष्ठता	१. पीतावभासता	१. अङ्गगौरवम्	१ चयकारणविद्वेषः (सु. सू. २१)२
२. पूर्णकोष्ठता	२. मन्दोष्मता	२. आलस्यम्	२. विपरीतगुणेच्छा (अ. सं. सू. २०)

प्रकोपावस्थायां दोषाणां लिङ्गानि (अ.सं.सू.२०)४

वातलिङ्गम्	पित्तलिङ्गम्	कफलिङ्गम्
१. कोष्ठतोदः	१. अम्लोद्गारः	१. अन्नद्वेषः
२. कोष्ठे वातसंचरणम्	२. पिपासा	२. हृल्लासः
	३. परिदाहः	(सु. सू. २१)३

---

१ "संहतिरूपा वृद्धिश्चयः।" "चयो वृद्धिः स्वधाम्न्येव।" (अ. सं. २०)।

२ "तत्र खलु संचितानां दोषाणां स्तब्धपूर्णकोष्ठता पीतावभासता मन्दोष्मता चाङ्गानां गौरवमालस्यं चयकारणविद्वेषश्चेति लिङ्गानि भवन्ति।" (सु. सू. २१)

३ "तेषां प्रकोपात् कोष्ठतोदसंचरणाम्लीकापिपासापरिदाहान्नद्वेषहृदयोत्क्लेदाश्च जायन्ते।" (सु. सू. २१)

४ "कोपस्तून्मार्गगामिता।" (अ. सं. सू. २०)।

प्रसरावस्थायां दोषलिङ्गानि (सु.सू.२१)[1]

वातलिङ्गानि	पित्तलिङ्गानि	कफलिङ्गानि
१. विमार्गगमनम्	१. ओषः	१. अरोचकः
२. आटोपः	२. चोषः	२. अविपाकः
	३. परिदाहः	३. अङ्गसादः
	४. धूमायनम्	४. छर्दिः

(सु.सू.२१)[2]

स्थानसंश्रयावस्थायां दोषाणां लिङ्गानि

उत्पत्स्यमानानां व्याधीनां पूर्वरूपप्रादुर्भावः

दोषाणां स्थानविशेषसंश्रये जायमाना विकाराः

उदरसन्निवेशे जायमाना रोगाः	बस्तिसन्निवेशे जायमाना रोगाः	मेढ्रसन्निवेशे जायमाना रोगाः
१. गुल्मः	१. प्रमेहाः	१. निरुद्धप्रकशः
२. विद्रधिः	२. अश्मरी	२. उपदंशः
३. उदराणि	३. मूत्राघातः	३. शूकदोषप्रभृतयः
४. अग्निसङ्गः	४. मूत्रदोषप्रभृतयः	
५. आनाहः		
६. विसूचिका		
७. अतिसारप्रभृतयः		

---

१ 'तेषामेभिरातङ्कविशेषैः प्रकुपितानां किण्वोदकपिष्टसमवाय इवोद्रिक्तानां प्रसरो भवति।" (सु. सू. २१) "मद्यसंधाने यथा पिष्टादि कालादितोद्रेकं प्रसरति, तथा दोषा अपि हेतुबलादुद्रिक्ताः प्रसरन्ति देशान्तरं चलन्ति।" (चक्र:) "दोषाणां प्रसरो यथाकामं संचारः।" (हा.)

२ "एवं प्रकुपितानां प्रसरतां वायोर्विमार्गगमनाटोपौ, ओषचोषपरिदाहधूमायनानि पित्तस्य, अरोचकाविपाकाङ्गसादाश्छर्दिश्चेति श्लेष्मणो लिङ्गानि भवन्ति।" (सु. सू. २१)

३ 'स्थानसंश्रयिणः क्रुद्धाः भाविव्याधिप्रबोधकम्। दोषाः कुर्वन्ति यल्लिङ्गं पूर्वरूपं तदुच्यते।" (इति मधुकोशव्याख्यायामुद्धृतं तन्त्रान्तरवचनम्)

दोषाणां स्थानविशेषसंश्रये जायमाना विकाराः

गुदसन्निवेशे जायमाना रोगाः	वृषणसन्निवेशे जायमाना रोगाः	ऊर्ध्वजत्रुसन्निवेशे जायमाना रोगाः	त्वङ्मांसरक्तसन्निवेशे जायमाना रोगाः
१ भगन्दरः	१ वृद्धयः	१ ऊर्ध्वजत्रुजा व्याधयः	१ क्षुद्ररोगाः
२ अर्शःप्रभृतयः			२ कुष्ठानि
			३ विसर्पाः

मेदःसन्निवेशे जायमाना रोगाः	अस्थिसन्निवेशे जायमाना रोगाः	पादसन्निवेशे जायमाना रोगाः	सर्वाङ्गसन्निवेशे जायमाना रोगाः
१ ग्रन्थयः	१ विद्रधिः	१ श्लीपदः	१ ज्वरः
२ अपची	२ अनुशयी	२ वातशोणितम्	२ सर्वाङ्गरोगः
३ अर्बुदः		३ वातकण्टकः	(सु. सू. २१)१
४ गलगण्डः			
५ अलजीप्रभृतयः			

१ "ते यदोदरसन्निवेशं कुर्वन्ति तदा गुल्मविद्रध्युदराग्निसङ्गानाहविसूचिकातिसारप्रभृतीञ्जनयन्ति; बस्तिगताः प्रमेहाश्मरीमूत्राघातमूत्रदोषप्रभृतीन्; मेढ्रगता निरुद्धप्रकशोपदंशशूकदोषप्रभृतीन्; गुदगता भगन्दरार्शःप्रभृतीन्; वृषणगता वृद्धीः; ऊर्ध्वजत्रुगतास्तूर्ध्वजान्; त्वङ्मांसशोणितस्थाः क्षुद्ररोगान् कुष्ठानि विसर्पांश्च; मेदोगता ग्रन्थ्यपच्यर्बुदगलगण्डालजीप्रभृतीन्; अस्थिगता विद्रध्यनुशयीप्रभृतीन्; पादगताः श्लीपदवातशोणितवातकण्टकप्रभृतीन्; सर्वाङ्गगता ज्वरसर्वाङ्गरोगप्रभृतीन्; (सु.सू.२१)

प्राणादिपञ्चविधवातप्रकोपजा व्याधयः

प्राणप्रकोपजा रोगाः	उदानप्रकोपजा रोगाः	व्यानप्रकोपजा रोगाः	समानप्रकोपजा रोगाः	अपानप्रकोपजा रोगाः
१. नेत्रादीन्द्रियोपघातः	१. कण्ठरोधः	१. पुंस्त्वभ्रंशः	१. शूलम्	१. पक्वाशयजाः व्याधयः
२. पीनसः	२. मनोभ्रंशः	२. उत्साहभ्रंशः	२. गुल्मः	२. मूत्रदोषाः
३. अर्दितः	३. छर्दिः	३. बलभ्रंशः	३. ग्रहणीरोगः	३. शुक्रदोषाः
४. अतितृषा	४. अरोचकः	४. शोथः	४. पक्वामाशयजा रोगाः (अ.सं.नि.१६)१	४. अर्शांसि
५. कासः	५. पीनसः	५. चित्तोप्लवः	५. अग्निसादः	५. गुदभ्रंशादयो बस्तिगुदाश्रया रोगाः (अ.सं.नि.१६)१
६. श्वासः (अ.सं.नि. १६)१	६. गलगण्डादयः (अ.सं.नि.१६)१	६. ज्वरः	६. अतीसारः (सु.नि.१)२	
७. हिक्काश्वासादयो गदाः (सु.नि.१)२		७. सर्वाङ्गरोगः		
		८. निस्तोदः		
		९. रोमहर्षः		
		१०. अङ्गसुप्तता		
		११. कुष्ठम्		
		१२. विसर्पः		
		१३. अन्ये च सर्वाङ्गव्याधयः (अ.सं.नि.१६)१		

१ "प्राणः××कुपितश्चक्षुरादीनामुपघातं प्रवर्तयेत्। पीनसार्दिततृट्कासश्वासादींश्चामयान् बहून्॥ उदानः××विकृतो गदान्। कण्ठरोधमनोभ्रंशच्छर्द्यरोचकपीनसान्। कुर्याच्च गलगण्डादींस्तांस्ताञ्जत्रूर्ध्वसंश्रयान्। व्यानः××दूषितः। पुंस्त्वोत्साहबलभ्रंशशोफचित्तोत्प्लवज्वरान्। सर्वाङ्गरोगनिस्तोदरोमहर्षाङ्गसुप्तताः। कुष्ठं विसर्पमन्यांश्च कुर्यात् सर्वाङ्गगान् गदान्॥ समानः××दूषितः। शूलगुल्मग्रहण्यादीन् पक्वामाशयजान् गदान्॥ अपानः××कुपितः कुरुते रोगान् कृच्छ्रान् पक्वाशयाश्रयान्। मूत्रशुक्रप्रदोषार्शोगुदभ्रंशादिकान् बहून्॥(अ.सं.नि.१६)।

२ "प्राणः××× प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान्।' उदानः ×× ऊर्ध्वजत्रुगतान् रोगान् करोति च विशेषतः। समानः×××गुल्माग्निसादातीसारप्रभृतीन् कुरुते गदान्। व्यानः×××क्रुद्धश्च कुरुते रोगान् प्रायशः सर्वदेहगान्। अपानः××क्रुद्धश्च कुरुते रोगान् घोरान् बस्तिगुदाश्रयान्॥' (सु.नि.१)

सन्निपाते दोषाणां वृध्धसमक्षीणत्वे जायमाना विकाराः

वृद्धे वाते समे पित्ते क्षीणे च कफे
जायमाना विकाराः

१. भेदः
२. अनवस्थितो दाहः
३. श्रमः
४. दौर्बल्यम्

वृद्धे वाते समे कफे क्षीणे च पित्ते
जायमाना विकाराः

१. शूलम्
२. शैत्यम्
३. स्तम्भः
४. गौरवम्

वृद्धे पित्ते समे वाते क्षीणे च कफे
जायमाना विकाराः

१. दाहः
२. शूलम्

वृध्धे पित्ते समे वाते क्षीणे च कफे
जायमाना विकाराः

१. तन्द्रा
२. गौरवम्
३. ज्वरः

वृध्धे कफे समे वाते क्षीणे च पित्ते
जायमाना विकाराः

१. शीतम्
२. गौरवम्
३. रुक्

वृध्धे कफे समे पित्ते क्षीणे च वाते
जायमाना विकाराः

१. अग्निमान्द्यम्
२. शिरोग्रहः
३. निद्रा
४. तन्द्रा
५. प्रलापः
६. हृद्रोगः
७. गात्रगौरवम्
८. नखादीनां पीतत्वम्
९. कफपित्तयोः ष्ठीवनम्
(च.सू.१७)१

---

१ "प्रकृतिस्थं यदा पित्तं मारुतः श्लेष्मणः क्षये। स्थानादादाय गात्रेषु यत्र यत्र विसर्पति॥ तदा भेदश्च दाहश्च तत्र तत्रानवस्थितः। गात्रदेशे भवत्यस्य श्रमो दौर्बल्यमेव च॥ प्रकृतिस्थः कफो वायुः क्षीणे पित्ते यदा बली। कुर्यात्तदा शूलं सशैत्यस्तम्भगौरवम्। यदाऽनिलं प्रकृतिगं पित्तं कफपरिक्षये। संरुणद्धि तदा दाहः शूलं चास्योपजायते। श्लेष्माणं हि समं पित्तं यदा वातपरिक्षये। सन्निरुन्ध्यात्तदा कुर्यात् सतन्द्रा-गौरवं ज्वरम्॥ प्रवृद्धो हि यदा श्लेष्मा पित्ते क्षीणे समीरणम्॥ रुन्ध्यात्तदा प्रकुर्वीत शीतकं गौरवं रुजम्। समीरणे परिक्षीणे कफः पित्तं समत्वगम्। कुर्वीत सन्निरुन्धानो मृद्वग्नित्वं शिरोग्रहम्। निद्रां तन्द्रां प्रलापं च हृद्रोगं गात्रगौरवम्। नखादीनां च पीतत्वं ष्ठीवनं कफपित्तयोः॥ (च.सू.१७)

कफपित्तयोर्वृद्धयोः क्षीणे च वाते	कफवातयोर्वृद्धयोः क्षीणे च पित्ते	वातपित्तयोर्वृद्धयोः क्षीणे च कफे
जायमाना विकाराः	जायमाना विकाराः	जायमाना विकाराः
१. अरोचकः	१. स्तम्भः	१. भ्रमः
२. अपाकः	२. शैत्यम्	२. उद्वेष्टनम्
३. सादः	३. अनवस्थिततोदः	३. तोदः
४. गौरवम्	४. गौरवम्	४. दाहः
५. हृल्लासः	५. अग्निमान्द्यम्	५. स्फुटनम्
६. आस्यस्रवणम्	६. अन्नाश्रद्धा	६. वेपनम्
७. पाण्डुत्वम्	७. प्रवेपनम्	७. अङ्गमर्दः
८. दूयनम्	८. नखादीनां शुक्लत्वम्	८. परिशोषः
९. मदः	९. गात्रपारुष्यम्	९. दूयनम्
१०. विरेकवैषम्यम्		१०. धूपनम्
११. अग्निवैषम्यम्		

कफे वृद्धे वातपित्तयोश्च क्षीणयोः	वृद्धे पित्ते कफवातयोश्च क्षीणयोः	वाते वृद्धे पित्तकफयोश्च क्षीणयोः
जायमाना विकाराः	जायमाना विकाराः	जायमाना विकाराः
१. स्रोतःपिधानम्	१. ओजःस्रंसनम्	१. मर्मपीडनम्
२. चेष्टाप्रणाशः	२. ग्लानिः	२. संज्ञाप्रणाशः
३. मूर्च्छा	३. इन्द्रियदौर्बल्यम्	३. वेपनम्
४. वाक्संगः	४. तृष्णा	(च.सू.१७)१
	५. मूर्च्छा	
	६. क्रियाक्षयः	

१ 'हीनवातस्य तु श्लेष्मा पित्तेन सहितश्चरन्। करोत्यरोचकापाकौ सदनं गौरवं तथा॥ हृल्लासमास्यस्रवणं पाण्डुतां दूयनं मदम्। विरेकस्य च वैषम्यं वैषम्यमनलस्य च॥ हीनपित्तस्य तु श्लेष्मा मारुतेनोपसंहितः। स्तम्भं शैत्यं च तोदं च जनयत्यनवस्थितम्॥ गौरवं मृदुतामग्नेर्भक्ताश्रद्धां प्रवेपनम्। नखादीनां च शुक्लत्वं गात्रपारुष्यमेव च॥ मारुतस्तु कफे हीने पित्तं च कुपितं द्वयम्। करोति यानि लिङ्गानि शृणु तानि समासतः॥ भ्रममुद्वेष्टनं तोदं दाहं स्फुटनवेपने। अङ्गमर्दं परीशोषं दूयनं धूपनं तथा॥ वातपित्तक्षये श्लेष्मा स्रोतांस्यपिदधद्भृशम्। चेष्टाप्रणाशं मूर्च्छां च वाक्संगं च करोति हि॥ वातश्लेष्मक्षये पित्तं देहौजः स्रंसयेच्चरेत्। ग्लानिमिन्द्रियदौर्बल्यं तृष्णां मूर्च्छां क्रियाक्षयम्॥ पित्तश्लेष्मक्षये वायुर्मर्माण्यतिनिपीडयन्। प्रणाशयति संज्ञां च वेपयत्यथवा नरम्॥ (च.सू. १७)

वातनानात्मजा रोगाः

१. नखभेदः
२. विपादिका
३. पादशूलम्
४. पादभ्रंशः
५. पादसुप्तता
६. वातखुड्डता
७. गुल्फग्रहः (वातगुल्फः का.)
८. पिण्डिकोद्वेष्टनम्
९. गृध्रसी
१०. जानुभेदः
११. जानुविश्लेषः
१२. ऊरुस्तम्भः
१३. ऊरुसादः
१४. पाङ्गुल्यम्
१५. गुदभ्रंशः
१६. गुदार्तिः
१७. वृषणाक्षेपः
१८. शेफस्तम्भः
१९. वंक्षणानाहः
२०. श्रोणिभेदः
२१. उदावर्तः
२२. खञ्जत्वम्
२२. (अ) विड्भेदः
२३. वामनत्वम्
२४. त्रिकग्रहः (कटिग्रहः, शा)
२५. पृष्ठग्रहः
२६. पार्श्वविमर्दः (पार्श्व-शूलम् शा.)
२७. उदरावेष्टः
२८. हृन्मोहः
२९. हृद्द्रवः
३०. वक्षउद्धर्षः
३१. वक्षस्तोदः
३२. वक्षउपरोधः
३३. बाहुशोषः
३४. ग्रीवास्तम्भः
३५. मन्यास्तम्भः
३६. कण्ठोध्वंसः
३७. हनुभेदः (हनुस्तम्भः, अ.सं.)
३८. ओष्ठभेदः
३९. अक्षिभेदः (तालुभेदः, अ.सं.)
४०. दन्तभेदः
४१. दन्तशैथिल्यम्
४२. मूकत्वम्
४३. गद्गदत्वम् (यो.)
४४. वाक्संगः (वाग्ग्रहः का.)
४५. कषायास्यता
४६. मुखशोषः
४७. अरसज्ञता (घ्राणनाशः, च.)
४८. कर्णशूलम्
४९. अशब्दश्रवणम् अशब्दता., का.)
५०. उच्चैःश्रवणम्
५१. बाधिर्यम्
५२. वर्त्मस्तम्भः
५३. वर्त्मसङ्कोचः
५४. तिमिरम्
५५. अक्षिशूलम् (अक्षिशूलम्)
५६. अक्षिव्युदासः
५७. भ्रूव्युदासः
५८. शङ्खभेदः
५९. ललाटभेदः
६०. शिरोरुक्
६१. केशभूमिस्फुटनम्
६२. अर्दितम्
६३. एकाङ्गरोगः
६४. सर्वाङ्गरोगः
६५. पक्षवधः
६६. आक्षेपकः
६७. दण्डकः (दण्डापतानकः, शा.)
६८. तमः (भ्रमः, अ.सं.)
६९. भ्रमः (श्रमः, का.)
७०. वेपथुः
७१. जृम्भा (विजृम्भिका. का.)
७२. हिक्का
७३. विषादः
७४. प्रलापः
७५. ग्लानिः (यो.)
७६. रौक्ष्यम्
७७. पारुष्यम्
७८. श्यावारुणावभासता
७९. अस्वप्नः
८०. अनवस्थितचित्तत्वम् (च. सू. २०)१ (निद्रापरिक्षयः, का.)
८१. अनिलग्रहः
८२. वातकण्टकः
८३. विड्ग्रहः
८४. कुब्जत्वम्
८५. हनुग्रहः
८६. घ्राणनाशः
८७. भ्रमः
८८. श्वासः
८९. विषादः
९०. वन्ध्यात्वम्
९१. षाण्ढ्यम्
९२. प्रतिश्यायः (का.सं.पू. २८–२९)२
९२. (अ) शिरोग्रहः
९३. बाह्यायामः
९४. अन्तरायामः
९५. खल्ली
९६. जिह्वास्तम्भः
९७. क्रोष्टुशीर्षः
९८. कषायवक्त्रता
९९. तूनी

"नखभेदः नखभङ्गुरता, विपादिका पाणिपादस्फुटनम्। पादभ्रंशः पादस्य आरोप्यविषयादन्यत्र पतनम्। पादसुप्तता पादयोर्निश्चिकत्वं स्पर्शाज्ञानं वा। वातखुड्डता खुड्डवातः खुड्डः, पादजङ्घासंधिः पिण्डिका जानुनोः मांसपिण्डः तयोरुद्वेष्टनम् दण्डादिना ताडनेनेव वेदना। गुल्फग्रहः गुल्फशूलम्। जानुभेदः जान्वोर्भेदवत् पीडा। जानुविश्लेषः जानुसन्धिशैथिल्यम्।

१००. प्रतितूनी	१११. प्रत्यष्ठीला	१२२. सिरास्फुरणम्	१३३. मुखवैरस्यम्
१०१. पादहर्षः	११२. अङ्गपीडा	१२३. सिरापूरणम्	१३४. आध्मानम्
१०२. विश्वाची	११३. अङ्गशूलम्	१२४. कार्श्यम्	१३५. प्रत्याध्मानम्
१०३. अवबाहुकः	११४. अङ्गसङ्कोचः	१२५. क्षिप्रमूत्रता	१३६. शीतता
१०४. अपतानकः	११५. अङ्गस्तम्भः	१२६. स्वेदनाशः	१३७. रोमहर्षः
१०५. व्रणायामः	११६. अङ्गभङ्गः	१२७. दुर्बलत्वम्	१३८. भीरुत्वम्
१०६. अपतन्त्रकः	११७. अङ्गविभ्रंशः	१२८. बलक्षयः	१३९. तोदः
१०७. अङ्गभेदः	११८. बद्धविट्कता	१२९. शुक्रातिप्रवृत्तिः	१४०. कण्डूः
१०८. अङ्गशोषः	११९. अत्युद्गारः	१३०. शुक्रकार्श्यम्	१४१. प्रसुप्तिः
१०९. मिन्मिनत्वम्	१२०. अन्त्रकूजनम्	१३१. शुक्रनाशः	१४२. दृक्क्षयः
११०. अष्ठीला	१२१. वातप्रवृत्तिः	१३२. काठिन्यम्	(शा॰ पू. ७)

१ "तत्रादौ वातविकाराननुव्याख्यास्यामः। तद्यथा नखभेदश्च, विपादिका च पादशूलं च पादभ्रंशश्च, पादसुप्तता च, वातखुड्डता च, गुल्फग्रहश्च, पिण्डिकोद्वेष्टनं च, गृध्रसी च, जानुभेदश्च, जानुविश्लेषश्च, ऊरुस्तम्भश्च, पाङ्गुल्यं च, गुदभ्रंशश्च, वृषणाक्षेपश्च, शेफस्तम्भश्च, श्रोणिभेदश्च, विड्भेदश्च, उदावर्तश्च, खञ्जत्वं च, कुब्जत्वं च, वामनत्वं च, त्रिकग्रहश्च, पृष्ठग्रहश्च, पार्श्वावमर्दश्च, उदरावेष्टश्च, हृन्मोहश्च, हृद्द्रवश्च, वक्षउद्धर्षश्च, वक्षउपरोधश्च, वक्षस्तोदश्च, बाहुशोषश्च, ग्रीवास्तम्भश्च, मन्यास्तम्भश्च, कण्ठोद्ध्वंसश्च, हनुभेदश्च, ओष्ठभेदश्च, अक्षिभेदश्च, दन्तभेदश्च, दन्तशैथिल्यं च, मूकत्वं च, वाक्सङ्गश्च, कषायास्यता च, मुखशोषश्च, अरसज्ञता च, घ्राणनाशश्च, कर्णशूलं च, अशब्दश्रवणं च, उच्चैःश्रुतिश्च, बाधिर्यं च, वर्त्मस्तम्भश्च, तिमिरं च, अक्षिशूलं च, अक्षिव्युदासश्च, भ्रूव्युदासश्च, शङ्खभेदश्च, ललाटभेदश्च, शिरोरुक् च, केशभूमिस्फुटनं च, अर्दितं च, एकाङ्गरोगश्च, सर्वाङ्गरोगश्च, (पक्षवधश्च), आक्षेपकश्च, दण्डकश्च, तमश्च, भ्रमश्च, वेपथुश्च, जृम्भा च, हिक्का च, विषादश्च, अतिप्रलापश्च, रौक्ष्यं च, पारुष्यं च, श्यावारुणावभासता च, अस्वप्नश्च, अनवस्थितचित्तत्वं च; इत्यशीतिर्वातविकारा वातविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याताः।" (च. सू. २०)

२ "पादभ्रंशः पादशूलं नखभेदो विपादिका। पादसुप्तिर्वातखुड्डो वातगुल्फेऽनिलग्रहः॥ गृध्रसीपिण्डकोद्वेष्टौ जानुविश्लेषभेदकौ। ऊरुस्तम्भोरुसादौ च पाङ्गुल्यं वातकण्टकः गुदभ्रंशो गुदार्तिश्च वृषणाक्षेपकस्तथा। शेफस्तम्भः श्रोणिभेदो वंक्षणानाहविड्ग्रहौ। उदावर्तोऽथ कुब्जत्वं वामनत्वं त्रिकग्रहः। पृष्ठग्रहः पार्श्वशूलं उदरावेष्टहृद्द्रवौ॥ हृन्मोहो वक्षसस्तोदो वक्षोद्धर्षोपरोधकौ। ग्रीवास्तम्भो बाहुशोषः कण्ठोद्ध्वंसो हनुग्रहः। दन्तचालौष्ठभेदौ च मूकत्वं वाग्ग्रहस्तथा। कषायास्यास्यशोषौ च घ्राणनाशो रसाज्ञता। बाधिर्यमुच्चैः श्रवणं कर्णशूलमशब्दता। वर्त्मसंकोचविष्टम्भौ तिमिरं शूलमक्षिषु। व्युदासो भ्रूव्युदासश्च शङ्खभेदः शिरोरुजा। स्फुटनं केशभूमेश्च॥" (का.सू. २८, २९) "अशीतिर्वातजा रोगाः कथ्यन्ते मुनिभाषिताः। आक्षेपको हनुस्तम्भः ऊरुस्तंभः शिरोग्रहः बाह्यायामोऽन्तरायामः पार्श्वशूलं कटिग्रहः। दण्डापतानकः खल्ली जिह्वास्तम्भस्तथार्दितम्। पक्षघातः क्रोष्टुशीर्षो मन्यास्तम्भश्च पङ्गुता। कलायखञ्जता तूनी प्रतितूनी च खञ्जता। पादहर्षो गृध्रसी च विश्वाची चापबाहुकः। अपतानो व्रणायामो वातकण्टोऽपतन्त्रकः। अङ्गभेदोऽङ्गशोषश्च मिन्मिनत्वं च गद्गदता। प्रत्यष्ठीलाऽष्ठीलिका च वामनत्वं कुब्जता। (अङ्गभङ्गोऽङ्गशूलं च सङ्कोचस्तम्भरूक्षताः) अङ्गपीडाङ्गविभ्रंशो विड्ग्रहो बद्धविट्कता मूकत्वमतिजृम्भा स्यादत्युद्गारोऽन्त्रकूजनम्। वातप्रवृत्तिः स्फुरणं शिराणां पूरणं तथा। कम्पः कार्श्यं श्यावता च प्रलापः क्षिप्रमूत्रता। निद्रानाशः स्वेदनाशः दुर्बलत्वं बलक्षयः अतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशश्च रेतसः। अनवस्थितचित्तत्वं काठिन्यं विरसास्यता। कषायवक्त्रताध्मानं प्रत्याध्मानं च शीतता। रोमहर्षश्च भीरुत्वं तोदः कण्डू रसाज्ञता। शब्दाज्ञता प्रसुप्तिश्च गन्धाज्ञत्वं दृशः क्षयः।" (शा. प्र. ७)

पित्तनानात्मजा विकाराः

१. ओषः
२. प्लोषः
३. दाहः (दवः, अ.सं.)
४. दवथुः
५. धूमकः
(धूमोद्गारः शा.)
६. अम्लकः
७. विदाहः
८. अन्तर्दाहः
९. अंसदाहः
१०. ऊष्माधिक्यम्
(अत्यौष्ण्यम्, अ.सं.)
११. अतिस्वेदः
१२. अङ्गगन्धः
१३. अङ्गावदरणम्
१४. शोणितक्लेदः
१५. मांसक्लेदः
१६. त्वग्दाहः
१७. त्वगवदरणम्
१८. चर्मदलनम्
१९. रक्तकोठः
२०. रक्तविस्फोटः
२१. रक्तमण्डलम्
२२. रक्तपित्तम्
२३. हरितत्वम्
२४. हारिद्रत्वम्
२५. नीलिका
२६. कक्षा
२७. कामला
२८. तिक्तास्यता
२९. लोहितगन्धास्यता
३०. पूतिमुखता
३१. तृष्णाधिक्यम्
३२. अतृप्तिः
३३. आस्यपाकः
३४. गलपाकः
३५. अक्षिपाकः
३६. गुदपाकः
३७. मेढ्रपाकः
३८. जीवादानम्
३९. तमःप्रवेशः
४०. हरितनेत्रत्वम्
४१. हारिद्रनेत्रत्वम्
४२. हरितमूत्रत्वम्
४३. हारिद्रमूत्रत्वम्
४४. हरितवर्चस्त्वम्
४५. हारिद्रवर्चस्त्वम्
(च. सू. २०)१
४६. अवयवसदनम्
४७. मांसावदरणम्
(अ. सं. सू. २०)२
४८. भ्रमः
४९. ज्वरः
५०. अङ्गदाहः
५१. अङ्गशीरणम्
५२. मांसपाकः
(का. सं. पृ. २९)३
५३. मतिभ्रमः
५४. कान्तिहानिः
५५. कण्ठशोषः
५६. मुखशोषः
५७. अल्पशुक्रता
५८. अङ्गपाकः
५९. क्लमः
६०. दौर्गन्ध्यम्
६१. अरतिः
६२. पीतावलोकनम्
६३. पीतदन्तता
६४. शीतेच्छा
६५. तेजोद्वेषः
६६. अल्पनिद्रता
६७. कोपः
६८. भिन्नविट्कता
६९. अन्धता
७०. उष्णोच्छ्वास-मूत्र-मलानामुष्णत्वम्
७१. पित्तनिःसरणम्
(शा. प्र. ७)४

१ "पित्तविकाराश्चत्वारिंशतमत ऊर्ध्वमनुव्याख्यास्यामः, ओषश्च, प्लोषश्च, दाहश्च, दवथुश्च, धूमकश्च, अम्लकश्च, विदाहश्च, अन्तर्दाहश्च, अंसदाहश्च, ऊष्माधिक्यं च अतिस्वेदश्च, (अङ्गगन्धश्च, अङ्गावदरणं च शोणितक्लेदश्च, मांसक्लेदश्च, त्वग्दाहश्च, मांसदाहश्च), त्वगवदरणं च, चर्मदलनं च रक्तकोठश्च रक्तविस्फोटश्च, रक्तपित्तं च रक्तमण्डलानि च, हरितत्वं च हारिद्रत्वं च नीलिका च, कक्षा (क्ष्या) च, कामला च, तिक्तास्यता च, लोहितगन्धास्यता च, पूतिमुखता च, तृष्णाधिक्यं च, अतृप्तश्च, आस्यविपाकश्च, गलपाकश्च, अक्षिपाकश्च, गुदपाकश्च, मेढ्रपाकश्च, जीवादानं च तमःप्रवेशश्च, हरितहारिद्रनेत्रमूत्रवर्चस्त्वं च; इति चत्वारिंशत्पित्तविकाराः पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याताः॥" (च.सू. २०)

२ "पित्तविकाराः पुनः ओषः प्लोषो दवो दवथुर्विदाहोऽन्तर्दाहस्त्वग्दाहोंऽसदाहो धूमकोऽम्लक ऊष्माधिक्यमतिस्वेदोऽङ्गगन्धोऽवयवसदनं शोणितक्लेदो मांसक्लेदस्त्वङ्मांसदरणं चर्मदरणं रक्तकोठो रक्तविस्फोटो रक्तमंडलानि रक्तपित्तं हरितत्वं नीलिका कक्ष्या कामला तिक्तास्यता लोहितगन्धास्यता पूतिमुखत्वं तृष्णाधिक्यमतृप्तिरास्यपाको गलपाकोऽक्षिपाकः पायुपाको मेढ्रपाको जीवादानं तमःप्रवेशो हरितहारिद्रनेत्रमूत्रशकृत्त्वं च ॥

(अ. सं. सू. २०)

३ ओषः प्लोषो भ्रमो दाहो वमथुर्धूमकाम्लकौ । अन्तर्दाहो ज्वरोऽत्यौष्ण्यमतिस्वेदोऽङ्गदाहकः । त्वग्दाहः शोणितक्लेदो मांसक्लेदोऽङ्गशीर्य(र)णक । मांसपाकश्चर्मदलो रक्तविस्फोटमंडले । रक्तपित्तं च कोठांश्च कक्ष्या हारिद्रनीलिके ॥ कामला तिक्तवक्त्रत्वं रक्तगन्धास्यता तथा । अतृप्तिः पूतिवक्त्रत्वं जीवादानं तमः तृषा । मेढ्रपायुगलाक्ष्यास्यपाको हारिद्रमूत्रविट्; इति प्रधानाः पित्तार्त्यः ।

(का. सं. पृ. २९)

४ "धूमोद्गारो विदाहः स्यादुष्णाङ्गत्वं मतिभ्रमः । कान्तिहानिः कण्ठशोषो मुखशोषोऽल्पशुक्रता । तिक्तास्यताम्लवक्त्रत्वं स्वेदस्रावोऽङ्गपाकता । क्लमो हरितवर्णत्वमतृप्तिः पीतगात्रता ॥ रक्तस्रावोऽङ्गदरणं लोहगन्धास्यता तथा । दौर्गन्ध्यं पूतिमूत्रत्वमरतिः पीतविट्कता । पीतावलोकनं पीतनेत्रता पीतदन्तता । शीतेच्छा पीतनखता तेजोद्वेषोऽल्पनिद्रता ॥ कोपश्च गात्रसादश्च भिन्नविट्कत्वमन्धता । उष्णोच्छ्वासत्वमुष्णत्वं मूत्रस्य च मलस्य च । तमसो दर्शनं पीतमण्डलानां च दर्शनम् । निःसरत्वं च पित्तस्य चत्वारिंशद्रुजः स्मृताः । (शा. प्र. ७)

कफनानात्मजा विकाराः

१. तृप्तिः
२. तन्द्रा
३. निद्राधिक्यम्
४. स्तैमित्यम्
५. गुरुगात्रता (गौरवम् शा.)
६. आलस्यम्
७. मुखस्रावः (प्रसेकः, अ. सं.)
८. मुखमाधुर्यम्
९. श्लेष्मोद्गिरणम्
१०. बलासकः (मलाधिक्यम्, यो.)
११. अपक्तिः
१२. हृदयोपलेपः
१३. कण्ठोपलेपः
१४. धमनीप्रतिचयः (धमन्युपलेपः)
१५. गलगण्डः
१६. अतिस्थौल्यम्
१७. शीताग्नि(ग्न)ता (वह्निसादः, का.)
१८. उदर्दः
१९. श्वेतावभासता
२०. नेत्रमूत्रवर्चसां श्वेतत्वम् (च.सू. २०)१
२१. हृल्लासः
२२. मलाधिक्यम्
२३. आमम् (का.पृ.३०)२
२४. मुखलेपः
२५. श्वेतावलोकनम्
२६. शैत्यम्
२७. उष्णेच्छा
२८. तिक्तकामिता
२९. शुक्रबाहुल्यम्
३०. बहुमूत्रता
३१. मन्दबुद्धित्वम्
३२. घर्घरवाक्यत्वम्
३३. अचैतन्यम् (शा. प्र. ७)३

---

१. "श्लेष्मविकारांश्च विंशतिमत ऊर्ध्वं व्याख्यास्यामः; तद्यथा तृप्तिश्च, तन्द्रा च, निद्राधिक्यं च, स्तैमित्यं च, गुरुगात्रता च आलस्यं च, मुखमाधुर्यं च, मुखस्रावश्च, श्लेष्मोद्गिरणं च, मलस्याधिक्यं च, बलासकश्च, अपक्तिश्च, हृदयोपलेपश्च, कण्ठोपलेपश्च, धमनीप्रतिचयश्च, गलगण्डश्च, अतिस्थौल्यं च, शीताग्निता च, उदर्दश्च, श्वेतावभासता च, श्वेतमूत्रनेत्रवर्चस्त्वं च, इति विंशतिः श्लेष्मविकाराः श्लेष्मविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवन्ति" (च. सू. २०)

२ "स्तैमित्यं गुरुताङ्गस्य निद्रा तन्द्रातितृप्तयः। मुखमाधुर्यसंस्रावकफोद्गारवलक्षयाः॥ हृल्लासोऽथ मलाधिक्यं धमनीकंठलेपकौ। आमं च गलगण्डश्च वह्निपाद उदर्दकः। श्वेतावभासताङ्गानां तथा मूत्रपुरीषयोः। कफजानामसंख्यानां प्रधानाः परिकीर्तिताः।" (का. पृ. ३०)

३ "कफस्य विंशतिः प्रोक्ता रोगास्तन्द्राऽतिनिद्रता। गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता॥ श्वेतावलोकनं श्वेतविट्कत्वं श्वेतमूत्रता। शैत्यमुष्णेच्छा तिक्तकामिता॥ मलाधिक्यं च शुक्रस्य बाहुल्यं बहुमूत्रता॥ आलस्यं मन्दबुद्धित्वं तृप्तिर्घर्घरवाक्यता। अचैतन्यं च गदिता विंशतिः श्लेष्मजा गदाः॥" (शा. प्र. ८)

रक्तजा रोगाः

१. मुखपाकः
२. अक्षिरागः
३. घ्राणस्य पूतिगन्धिता
४. मुखस्य पूतिगन्धिता
५. गुल्मः
६. उपकुशः
७. वीसर्पः
८. रक्तपित्तम्
९. प्रमीलकः
१०. विद्रधिः
११. रक्तमेहः
१२. प्रदरः
१३. वातशोणितम्
१४. वैवर्ण्यम्
१५. अग्निसादः
१६. पिपासा
१७. गुरुगात्रता
१८. सन्तापः
१९. अतिदौर्बल्यम्
२०. अरुचिः
२१. शिरोरुजा
२२. अन्नपानविदाहः
२३. तिक्तोद्गिरणम्
२४. अम्लोद्गिरणम्
२५. क्लमः
२६. क्रोधप्रचुरता
२७. बुद्धिसंमोहः
२८. लवणास्यता
२९. अतिस्वेदः
३०. शरीरदौर्गन्ध्यम्
३१. मदः
३२. कम्पः
३३. स्वरक्षयः
३४. तन्द्रा
३५. निद्रातियोगः
३६. तमसोऽतिदर्शनम्
३७. कण्डूः
३८. अरुंषि
३९. कोठः
४०. पिडका
४१. कुष्ठम्
४२. चर्मदलम्

(च. सू. २४)[1]

४३. गुदपाकः
४४. मेढ्रपाकः
४५. प्लीहा
४६. गुल्मः
४७. नीलिका:
४८. कामला
४९. व्यङ्गः
५०. पिप्लुः
५१. तिलकालकः
५२. दद्रुः
५३. चर्मदलम्
५४. श्वित्रम्
५५. पामा
५६. रक्तमण्डलम्

(च. सू. २८)[2]

५७. मशकः
५८. न्यच्छः
५९. इन्द्रलुप्तम्
६०. अर्शः
६१. अर्बुदम्
६२. अङ्गमर्दः

(सु. सू. २४)[3]

६३. दौर्बल्यम्
६४. उपजिह्वा
६५. स्रोतःपूतिभावः
६६. स्वरक्षयः
६७. वातरक्तम्
६८. विचर्चिका
६९. कण्डूयुक्तपिडकाः

(का. पृ. ३१)[4]

---

१ "मुखपाकोऽक्षिरागश्च पूतिघ्राणास्यगन्धिता। गुल्मोपकुशवीसर्परक्तपित्तप्रमीलकाः॥ विद्रधी रक्तमेहश्च प्रदरो वातशोणितम्। वैवर्ण्यमग्निसादश्च पिपासा गुरुगात्रता॥ सन्तापश्चातिदौर्बल्यमरुचिः शिरसश्च रुक्॥ विदाहश्चान्नपानस्य तिक्ताम्लोद्गिरणं क्लमः। क्रोधप्रचुरता बुद्धेः संमोहो लवणास्यता॥ स्वेदः शरीरदौर्गन्ध्यं मदः कम्पः स्वरक्षयः। तन्द्रानिद्रातियोगश्च तमसश्चातिदर्शनम्॥ कण्ड्वरुःकोठपिडकाकुष्ठचर्मदलादयः। विकाराः सर्व एवैते विज्ञेयाः शोणिताश्रयाः॥" (च. सू. २४)

२ "कुष्ठवीसर्पपिडका रक्तपित्तमसृग्दरः। गुदमेढ्रास्यपाकश्च प्लीहा गुल्मोऽथ विद्रधिः। नीलिका कामला व्यङ्गः पिप्लवस्तिलकालकाः। दद्रुश्चर्मदलं श्वित्रं पामा कोठास्रमण्डलम्। रक्तप्रदोषाज्जायन्ते" (च. सू. २८)

३ "कुष्ठवीसर्पपिडकामशकनीलिकातिलकालकन्यच्छव्यङ्गेन्द्रलुप्तप्लीहविद्रधिगुल्मवातशोणितार्शोऽर्बुदाङ्गमर्दासृग्दररक्तपित्तप्रभृतयो रक्तजाः।" (सु. सू. २४)

४ 'वैवर्ण्यसंतापशिरोक्षिरोगदौर्बल्यदौर्गन्ध्यतमःप्रवेशाः। वैसर्पविद्रध्युपजिह्वगुल्मरक्तप्रमेहप्रदरातिनिद्राः॥ मन्दाग्निता स्रोतसां पूतिभावः स्वरक्षयः स्वेदमदानिलासृक्। तृष्णाऽरुचिः कुष्ठविचर्चिकाश्च कण्डूः सकोठाः पिडका सकण्डूः॥" (का. पृ. ३१)

वातपित्तकफानामवजयनानि

वातपित्तकफघ्ना रसाः

वातघ्ना रसाः	पित्तघ्ना रसाः	कफघ्ना रसाः
१. मधुरः	१. कषायः	१. कषायः
२. अम्लः	२. मधुरः	२. कटुः
३. लवणः	३. तिक्तः	३. तिक्तः
		(च. सू. १)[१] (सु.सू.४१)[२]

वात-पित्त-कफहरा विपाकाः

वातहरो विपाकः	पित्तहरो विपाकः	कफहरो विपाकः
१. गुरुः (सु.)	१. गुरुः (सु.)	१. लघुः (सु.) (सु.सू.४१)[३]

वातपित्तकफहराणि वीर्याणि

वातहरे वीर्ये	पित्तहराणि वीर्याणि	कफहराणि वीर्याणि
१. उष्णं	१. शीतम्	१. तीक्ष्णम्
२. स्निग्धम्	२. मृदु	२. रूक्षम्
	३. पिच्छिलम्	३. विषदम्
		४. उष्णम् (सु.सू.४१)[४]

---

१ "स्वाद्वम्ललवणा वायुं कषायस्वादुतिक्तकाः। जयन्ति पित्तं श्लेष्माणं कषायकटुतिक्तकाः।" (च. सू. १)

२ "तत्र मधुराम्ललवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्मघ्नाः (सु. सू. ४१)

३ "गुरुपाको वातपित्तघ्नः लघुपाकः श्लेष्मघ्नः।" (सु.सू.४१)

४ "तत्र उष्णस्निग्धौ वातघ्नौ शीतमृदुपिच्छिलाः पित्तघ्नाः, तीक्ष्ण-रूक्ष-विशदाः श्लेष्मघ्नाः' (सु.सू.४१)

वातावजयनानि

वातहराणि कर्माणि

१ स्नेहकर्म (विधियुक्तम्)
२ स्वेदकर्म (विधियुक्तम्)
३ स्नेहोष्णमधुरलवणाम्लयुक्तानि मृदुसंशोधनानि
४ स्नेहोष्णमधुरलवणाम्लयुक्ताहाराः
५ अभ्यङ्गः
६ उपनाहः
७ उद्वेष्टनम्
८ उन्मर्दनम्
९ परिषेकः
१० अवगाहः
११ संवाहनम्
१२ पीडनम्
१३ वित्रासनम्
१४ विस्मापनम्
१५ विस्मारणम्
१६ सुरासवविधानम्
१७ स्नेहाः (दीपनीय, पाचनीय, वातहर, विरेचनीयोपहिताः)
१८ बस्तयः
१९ बस्तिनियमः (शतपाक, सहस्रपाक)
२० सुखशीलता (च.वि. ६)१
२१ अभ्यङ्गपूर्वमुपनाहोपवेष्टनोन्मर्दनपरिषेकावगाहनपीडनानि ।
२२ तैलम्
२३ मांसरसः
२४ अनुवासनानि
२५ स्त्रीसम्पर्कवर्जो हैमन्तो विधिः (अ. सं. सू. २१)२

---

१. "तस्यावजयनं–स्नेहस्वेदौ विधियुक्तौ, मृदूनि च संशोधनानि स्नेहोष्णमधुराम्ललवणयुक्तानि तद्वदभ्यवहार्याणि, अभ्यङ्गोपनाहनोद्वेष्टनोन्मर्दनपरिषेकावगाहनसंवाहनावपीडनवित्रासनविस्मापनविस्मारणानि, सुरासवविधानम्, स्नेहाश्चानेकयोनयो दीपनीयपाचनीयवातहरविरेचनीयोपहिताः, तथा शतपाकाः सहस्रपाकाः सर्वशश्च प्रयोगार्था बस्तयः, बस्तिनियमः, सुखशीलता चेति ॥"
(च. वि. ६)

२. "वातस्योपक्रमः स्नेहः स्वेदो मृदूनि स्निग्धोष्णमधुराम्ललवणानि संशोधनान्यभ्यवहार्याणि, चाभ्यङ्गपूर्वमुपनाहोपवेष्टनोन्मर्दनपरिषेकावगाहसंवाहनपीडनानि, वित्रासनविस्मापनानि, सुराविधानं, स्नेहाश्चानेकयोनयो दीपनीयपाचनीयवातहरविरेचनीयद्रव्योपहितास्तथा शतपाकसहस्रपाकाः सर्वशः प्रयोगार्था बस्तयो बस्तिनियमो विशेषतस्तैलं मांसरसोऽनुवासनानि सुखशीलता स्त्रीसंपर्करहितश्च हैमन्तो विधिः ।"
(अ. सं. सू. २१)

पित्तावजयनानि

१ सर्पिष्पानम्
२ सर्पिषा स्नेहनम्
३ अधोदोषहरणम् (विरेचनम्)
४ मधुर-कषाय-तिक्त-शीतानामौषधानामुपयोग:
५ मधुरतिक्तकषायशीतानामाहाराणामुपयोगः
६ परमशिशिरवारिसंस्थितानां मुक्तामणिहारावलीना-
मुरसा धारणम्
७ मृदु-मधुर-सुरभि-शीत-हृद्यानां गन्धानामुपसेवा
८ क्षणे क्षणेऽग्र्यचन्दनप्रियङ्गुकालीयकमृणालशीतवारिभि-
रभिप्रोक्षणम्
९ क्षणे क्षणे उत्पलकुमुदकोकनदसौगन्धिकपद्मानुगतै-
र्वारिभिरभिप्रोक्षणम्
१० श्रुतिसुख-मृदु-मधुर-मनोनुगतानां गीतवादित्राणां श्रवणम्
११ अभ्युदयानां श्रवणम्
१२ सुहृद्भिः संयोग:
१३ शीतोपहितांशुकस्रग्धारिणीभिरिष्टाभि: स्त्रीभि: संयोग:
१४ निशाकरकरांशुशीतलप्रवातहर्म्यवास:
१५ शैलान्तर-पुलिन-शिशिर-सदन-वसन-व्यजन-पवन-
सेवनम्
१६ सुखशिशिरसुरभिमारुतोपहितानां रम्याणामुपव-
नानां सेवनम्
१७ पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्रहस्ता-
नामुपसेवनम्
१८ सौम्यानां सर्वभावानामुपसेवनम् । (च. वि. ६)१
१९ मधुरशीतद्रव्यैर्विरेचनम्
२० कर्पूरचन्दनोशीरैरनुलेप:
२१ प्रदोष:
२२ शीताम्बुधारागर्भाणि गृहाणि
२३ पय: (अ. हृ. सू. १३)२

---

१ "तस्यावजयनं—सर्पिष्पानम्, सर्पिषा च स्नेहनं, अधश्च दोषहरणं, मधुरतिक्तकषायशीतानां चौषधाभ्यवहार्याणामुपयोग:, मृदुमधुरसुरभिशीतहृद्यानां चोपसेवा, मुक्तामणिहारावलीनां च परमशिशिरवारिसंस्थितानां धारणमुरसा, क्षणे क्षणेऽग्र्यचन्दनप्रियङ्गुकालीयमृणालशीतवारिभिरुत्पलकुमुदकोकनदसौगन्धिकपद्मानुगतैश्च वारिभिरभिप्रोक्षणं, श्रुतिसुखमृदुमधुरमनोऽनुगानां च गीतवादित्राणां श्रवणं, श्रवणं चाभ्युदयानां, सुहृद्भिः संयोग:, संयोगश्चेष्टाभि: स्त्रीभि: शीतोपहितांशुकस्रग्धारिणीभि:, निशाकरांशुशीतलप्रवातहर्म्यवास:, शैलान्तरपुलिनशिशिरसदनवसनसेवनं, रम्याणां चोपवनानां सुखशिशिरसुरभिमारुतोपहितानामुपसेवनं, सेवनं च पद्मोत्पलनलिनकुमुदसौगन्धिकपुण्डरीकशतपत्रहस्तानां सौम्यानां च सर्वभावानामिति । (च. वि. ६)

२ "पित्तस्य सर्पिष: पानं स्वादुशीतैर्विरेचनम् । स्वादुतिक्तकषायाणि भोजनान्यौषधानि च ॥ सुगन्धिशीतहृद्यानां गन्धानामुपसेवा धृति: । कर्पूरचन्दनोशीरैरनुलेप: क्षणे क्षणे ॥ प्रदोषश्चन्द्रमा: सौधं हारि गीतं हिमोऽनिल: ॥ अयन्त्रणसुखं मित्रं पुत्र: संदिग्धमुग्धवाक् । छन्दानुवर्तिनो दारा: प्रिया: शीलविभूषिता: ॥ शीताम्बुधारागर्भाणि गृहाण्युद्यानदीर्घिका: । सुतीर्थविपुलस्वच्छसलिलाशयसैकते ॥ साम्भोजजलतीरान्ते कायमाने द्रुमाकुले । सौम्या भावा: पय: सर्पिर्विरेकश्च विशेषत: ।" (अ. हृ. सू. १३)

श्लेष्मावजयनानि

१. विधियुक्तानि तीक्ष्णोष्णानि संशोधनानि
२. कटुतिक्तकषायोपहिता रूक्षोष्णा आहाराः
३. धावनम्
४. लङ्घनम्
५. प्लवनम्
६. परिसरणम्
७. जागरणम्
८. नियुद्धम्
९. व्यवायः
१०. व्यायामः
११. उन्मर्दनम्
१२. स्नानम्
१३. उत्सादनम्
१४. तीक्ष्णानां दीर्घकालस्थितानां मद्यानामुपयोगः
१५. धूमपानम्
१६. उपवासः
१७. उष्णं वासः
१८. सुखप्रतिषेधः (च. वि. ६)१
१९. रूक्षोन्मर्दनम्
२०. क्षौद्रम्
२१. यूषः
२२. वमनानि
२३. गण्डूषः
२४. वासन्तिको विधिः (अ. सं. सू. २१)२
२५. रूक्षाल्पतीक्ष्णोष्णमन्नम्
२६. तीक्ष्णं वमनविरेचनम्
२७. मेदोघ्नमौषधम् (अ. हृ. सू. १३)३

---

१ "तस्यावजयनम्—विधियुक्तानि तीक्ष्णोष्णानि संशोधनानि, रूक्षप्रायाणि चाभ्यवहार्याणि कटुतिक्तकषायोपहितानि, तथैव धावनलङ्घनप्लवनपरिसरणजागरणनियुद्धव्यवायव्यायामो - न्मर्दनस्नानोत्सादनानि, विशेषतस्तीक्ष्णानां दीर्घकालस्थितानां मद्यानामुपयोगः सधूमपानः, सर्वशश्चोपवासः तथोष्णं वासः, सुखप्रतिषेधश्च सुखार्थमेवेति।" (च.वि.८)

२ "श्लेष्मणः पुनर्विधिहितानि तीक्ष्णानि संशोधनानि विरूक्षप्रायाण्यभ्यवहार्याणि कटुतिक्तकषायोपहितानि तीक्ष्णानि दीर्घकालस्थितानि हृद्यानि मद्यानि॥ धावनलंघनप्लवनजागरणनियुद्धं व्यवायरूक्षोन्मर्दनस्नानोत्सादनानि क्षौद्रं यूषो वमनानि सर्वशश्चोपवासः सधूमगंडूषः सुखार्थी वासन्तो विधिरिति।" (अ. सं. सू. २१)

३ श्लेष्मणो विधिना युक्तं तीक्ष्णं वमनरेचनम्। अन्नं रूक्षाल्पतीक्ष्णोष्णं कटुतिक्तकषायकम्॥ दीर्घकालस्थितं मद्यं रतिप्रीतिः प्रजागरः। अनेकरूपो व्यायामश्चिंता रूक्षं विमर्दनम्॥ विशेषाद्वमनं यूषः क्षौद्रं मेदोघ्नमौषधम्। धूमोपवासगण्डूषा निःसुखत्वं सुखाय च।" (अ.हृ.सू १३)

दोषसंशमनानि

वातसंशमनानि

१. भद्रदारु:
२. कुष्ठम्
३. हरिद्रा
४. वरुण:
५. मेषशृङ्गी
६. बला
७. अतिबला
८. आर्तगल:
९. कच्छुरा
१०. शल्लकी
११. कुबेराक्षि
१२. वीरतरु:
१३. सहचर:
१४. अग्निमन्थ:
१५. वत्सादनी
१६. एरण्ड:
१७. अश्मभेदक:
१८. अर्क:
१९. अलर्क:
२०. शतावरी
२१. पुनर्नवा
२२. वसुक:
२३. वशिर:
२४. काञ्चनक:
२५. भार्गी
२६. कार्पासी
२७. वृश्चिकाली
२८. पत्तूर:
२९. बदर:
३०. यव:
३१. कोलम्
३२. कुलत्थ:
३३. विदारिगन्धा
३४. विदारी
३५. विश्वदेवा
३६. सहदेवा
३७. श्वदंष्ट्रा
३८. पृथक्पर्णी
३९. सारिवा
४०. कृष्णसारिवा
४१. जीवक:
४२. ऋषभक:
४३. महासहा
४४. क्षुद्रसहा
४५. कण्टकारी
४६. बृहती
४७. हंसपदी
४८. लघुपञ्चमूलम्
४९. शालपर्णी
५०. बृहत्पञ्चमूलम्
५१. बिल्व:
५२. टिण्टुक:
५३. पाटला
५४. काश्मरी (सु.सू.३९)१

१ संशमनान्यत ऊर्ध्वं वक्ष्याम: —
तत्र भद्रदारुकुष्ठहरिद्रावरुणमेषशृंगीबलातिबलार्तगलकच्छुराशल्लकीकुबेराक्षीवीरतरुसहचराग्निमन्थवत्सादन्येरण्डाश्मभेदकालर्कशतावरीपुनर्नवावसुकवशिरकांचनकभार्गीकार्पासीवृश्चिकालीपत्तूरबदरयवकोलकुलत्थप्रभृतीनि विदारिगन्धादिश्च द्वे चाद्ये पञ्चमूल्यौ समासेन वातसंशमनो वर्ग:। (सु.सू.३९)

दोषसंशमनानि

पित्तसंशमनानि

१ चन्दनम्
२ कुचन्दनम्
३ ह्रीवेरम्
४ उशीरः
५ मञ्जिष्ठा
६ पयस्या
७ विदारी
८ शतावरी
९ गुन्द्रा
१० शैवालम्
११ कह्लारम्
१२ कुमुदम्
१३ उत्पलम्
१४ कदली (कन्दली)
१५ दूर्वा
१६ मूर्वा

काकोल्यादिः

१७ काकोली
१८ क्षीरकाकोली
१९ जीवकः
२० ऋषभकः
२१ मुद्गपर्णी
२२ माषपर्णी
२३ मेदा
२४ महामेदा
२५ छिन्नरुहा
२६ कर्कटशृङ्गी
२७ तुगाक्षीरी
२८ पद्मकम्
२९ प्रपौण्डरीकम्
३० ऋद्धिः
३१ वृद्धिः
३२ मृद्वीका
३३ जीवन्ती

सारिवादिः

३४ सारिवा
३५ मधुकम्
३६ काश्मरीफलम्
३७ मधूकपुष्पम्

अञ्जनादिः

३८ अञ्जनम्
३९ रसाञ्जनम्
४० नागपुष्पम्
४१ नीलोत्पलम्
४२ नलदः
४३ नागकेशरः

उत्पलादिः

४४ उत्पलम्
४५ रक्तोत्पलम्
४६ सौगन्धिकम्
४७ कुवलयम्
४८ पुण्डरीकम्

न्यग्रोधादिः

४९ न्यग्रोधः
५० उदुम्बर
५१ प्लक्षः
५२ अश्वत्थः
५३ कपीतनः
५४ ककुभः
५५ आम्रः
५६ कोशाम्रः
५७ लाक्षा
५८ चोरकपत्रम्
५९ जम्बूद्वयम्
६० प्रियालः
६१ रोहिणी
६२ वञ्जुलः
६३ कदम्बः
६५ बदरी
६४ तिन्दुकम्
६६ शल्लकी
६७ रोध्रः
६८ सावररोध्रः
६९ भल्लातकः
७० पलाशः
७१ नन्दीवृक्षः

तृणपञ्चमूलम्

७२ कुशः
७३ काशः
७४ नलः
७५ दर्भः
७६ काण्डेक्षुः

(सु. सू. ३९)[1]

---

१ 'चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठापयस्याविदारीशतावरी-गुन्द्राशैवालकह्लारकुमुदोत्पलकन्दलीदूर्वामूर्वाप्रभृतीनि काकोल्यादिः सारिवादिरञ्जनादिरुत्पलादिर्न्यग्रोधादिस्तृणपञ्चमूलमिति समासेन पित्तसंशमनो वर्गः। (सु. सू. ३९)

दोषसंशमनानि

कफसंशमनानि

१. कालेयकम्
२. अगुरु
३. तिलपर्णी
४. कुष्ठम्
५. हरिद्रा
६. शीतशिवम्
७. शतपुष्पा
८. सरल:
९. रास्ना
१०. प्रकीर्या
११. उदकीर्या
१२. इङ्गुदी
१३. सुमना
१४. काकादनी
१५. लाङ्गलकी
१६ हस्तिकर्ण:
१७. मुञ्जातक:
१८. मामज्जक:
१९. वल्लीपञ्चमूलम्
२०. विदारी
२१. सारिवा
२२. गुडूची
२३. अजशृङ्गी
२४. कण्टकपञ्चमूलम्
२५. करमर्दक:
२६. त्रिकण्टक:
२७. सैरेयक:
२८. शतावरी
२९. गृध्रनखी

पिप्पल्यादि:

३०. पिप्पली
३१. पिप्पलीमूलम्
३२. चव्यम्
३३. चित्रक:
३४. शृङ्गवेरम्
३५. मरिचम्
३६. हस्तिपिप्पली
३७. हरेणुका
३८. एला
३९. अजमोदा
४०. इन्द्रयव:
४१. पाठा
४२. जीरक:
४३. सर्षप:
४४. महानिम्बफलम्
४५. हिङ्गु
४६. भार्गी
४७. मधुरसा
४८. अतिविषा
४९. वचा
५०. विडङ्ग:
५१. कटुरोहिणी

बृहत्यादि:

५२. बृहती
५३. कण्टकारिका
५४. मधुकम्

मुष्ककादि:

५५. मुष्कक:
५६. पलाश:
५७. धव:
५८. मदन:
५९. वृक्षक:
६०. शिंशपा
६१. वज्रवृक्ष:
६२. हरीतकी
६३. विभीतक:
६४. आमलकम्

वचादि:

६६. वचा
६७. मुस्ता
६८. अतिविषा
६९. अभया
७०. देवदारु:

सुरसादि:

७१. सुरसा
७२. श्वेतसुरसा
७३. फणिज्झक:
७४. अर्जक:
७५. भूस्तृणम्
७६. सुगन्धक:
७७. सुमुख:
७८. कालमाल:
७९. कुठेरक:
८०. कासमर्द:
८१. क्षवक:
८२. खरपुष्पा
८३. विडङ्गम्
८४. कट्फलम्
८५. सुर(सी)
८६. निर्गुण्डी
८७. कुलाहल:
८८. उन्दुरुकर्णिका
८९. फञ्जी
९०. प्राचीबलम
९१. विषमुष्टिक:

आरग्वधादि:

९३. आरग्वध:
९४. गोपघोण्टा
९५. कण्टकी
९६. पाटला
९७. मूर्वा
९८. सप्तपर्ण:
९९. निम्ब:
१००. दासीकुरण्टक:
१०१. शार्ङ्गेष्टा
१०२. पटोल:
१०३. किराततिक्तक:
१०४. सुषवी

(सु. सू. ३९)१

१ "कालेयकागुरुतिलपर्णीकुष्ठहरिद्राशीतशिवशतपुष्पासरलारास्नाप्रकीर्योदकीर्येङ्गुदीसुमन:काकादनीलाङ्गलकीहस्तिकर्णमुञ्जातकलामज्जकप्रभृतीनि वल्लीकण्टकपञ्चमूल्यौ पिप्पल्यादिबृहत्यादिमुष्ककादिर्वचादि: सुरसादिरारग्वधादिरिति समासेन श्लेष्मसंशमनो वर्ग:। (सु. सू. ३९)

सामदोषाणां सामान्यलक्षणानि (अ.हृ.सू. १३) १,२

१. स्रोतोरोधः	३. गौरवम्	५. आलस्यम्	७. निष्ठीवनम्	९. अरुचिः
२. बलभ्रंशः	४. अनिलमूढता वायोः सम्यग- संचारः	६. अपक्तिः	८. मलप्रवृत्तिः	१०. क्लमः (मधुकोशव्याख्या) ३ (अ.हृ.सू. १३)३

समानां वातपित्तकफानां लक्षणानि

सामवातलक्षणानि		सामपित्तलक्षणानि	सामकफलक्षणानि
१. विबन्धः	१२. रात्रौ वृद्धिः (मधुकोश)१	१. दुर्गन्धः	१. आविल(मलिन)त्वम्
२. अग्निसादः (अग्निमान्द्यम्)	१३. स्तैमित्यम्	२. हरितवर्णः	२. तन्तुमत्त्वम्
३. तन्द्रा	१४. गौरवम्	३. श्याववर्णः (असितम्, अ. सं.)	३. स्त्यानता
४. अन्त्रकूजनम्	१५. स्निग्धत्वम्	४. अम्लरसः	४. कण्ठदेशेऽवस्थानम्
			५. दुर्गन्धः
५. अङ्गवेदना	१६. अरोचकः	५. स्थिरत्वम्	६. क्षुधानाशः
६. अङ्गशोथः	१७. आलस्यम्	६. गुरुत्वम्	७. उद्गाराभावः
७. अङ्गतोदः	१८. शैत्यम्	७. अम्लोद्गारः	८. प्रलेपित्वम्
८. अङ्गग्रहः	१९. कटुरूक्षाभिलाषः	८. कण्ठदाहः	९. पिच्छिलम्
९. स्नेहादिवातोपक्रमैर्वृद्धिः	२०. कटुरूक्षोपशयः	९. हृद्दाहः (मधुकोशः)	(अ.सं.सू.२१)७
	२१. अर्तिः	१०. कटुकत्वम्	
१०. सूर्योदये वृद्धिः	२२. आध्मानम्	११. बहलत्वम्	
११. मेघोदये वृद्धिः	(अ.सं.सू.२१)७	१२. गुरुत्वम् (अ.सं.सू. २१)७	

१ "ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम् । दुष्टमामाशयगतं रसमामं प्रचक्षते। अन्ये दोषेभ्य एवाति दुष्टेभ्योऽन्योन्यमूर्च्छनात् । कोद्रवेभ्यो विषस्येव वदन्त्यामस्य संभवम्। आमेन तेन संपृक्ता दोषा दूष्याश्च मूर्च्छिताः। सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः।"(अ.हृ.सू.१३)

२ "द्रवं गुर्वनेकवर्णं हेतुः सर्वरोगाणाम् । स्निग्धं पिच्छिलमामं तन्तुमदनुबद्धशूलं दुर्गन्धि ।" (अरुणदत्तव्याख्यायां तन्त्रान्तरवचनम्)

३ "स्रोतोरोधबलभ्रंशगौरवानिलमूढताः । आलस्यापक्तिनिष्ठीवमलभेदारुचिक्लमाः ॥" (मधुकोशव्याख्या)

४ "वायुः सामो विबन्धाग्निसादतन्द्राऽन्त्रकूजनैः । वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीडयन् । विचरेद्युगपच्चापि गृह्णाति कुपितो भृशम् । स्नेहाद्यैर्वृद्धिमाप्नोति सूर्यमेघोदये निशि ॥" (अ.हृ.सू.१३ टीकासु पाठान्तरभेदः)

५ "दुर्गन्धि हरितं श्यावं पित्तमम्लं स्थिरं गुरु । अम्लिकाकण्ठहृद्दाहकरं सामं विनिर्दिशेत् ॥"

६ "आविलस्तन्तुलः स्त्यानः कण्ठदेशेऽवतिष्ठते। सामो बलासो दुर्गन्धः क्षुदुद्गारविघातकृत् ॥"

७ "वायुरामान्वयः सार्तिराध्मानकृदसंचरः । दुर्गन्धमसितं पित्तं कटुकं बहलं गुरु ॥ आविलस्तन्तुमांस्त्यानः प्रलेपी पिच्छिलः कफः ॥" (अ. सं. सू. २१) सर्वं च मारुतं सामं तन्द्रास्तैमित्यगौरवैः ।

निरामाणां वातपित्तश्लेष्मणां लक्षणानि

निरामो वातः	निरामं पित्तम्	निरामः कफः
१. विशदः	१. ईषत्ताम्रम्	१. फेनवान्
२. रूक्षः	२. पीतवर्णम्	२. पिण्डितः
३. विबन्धरहितः	३. अत्युष्णम्	३. पाण्डुः
४. अल्पवेदनः	४. कटुरसम्	४. निःसारः
५. विपरीतगुणैर्विशेषतः	५. अस्थिरम् (सरम्)	५. अगन्धः
स्निग्धैः प्रशमशीलः (मधुकोशः)१	६. विगन्धम्	६. छेदवान्
	७. रुचिकरम्	७. मुखशुद्धिकरः (मधुकोशव्याख्या)१
	८. पक्तिकरम्	८. अच्छः
	९. बलकरम् (मधुकोशः)१	९. विशदः
	१०. मेचकम् (अनेकवर्णम्)	१०. श्वेतः
	११. अच्छम् (अ.सं.सू.२१)२	११. मधुरः (अ. सं. सू. २१)२

१ "निरामो (वायुः) विशदो रूक्षो निर्विबन्धोऽल्पवेदनः। विपरीतगुणैः शान्तिं स्निग्धैर्याति विशेषतः॥ (निरामं पित्तं) आताम्रं पीतमत्युष्णं रसे कटुकमस्थिरम्। पक्वं विगन्धं विज्ञेयं रुचिपक्तिबलप्रदम्॥ (निरामः कफः) फेनवान्पिण्डितः पाण्डुर्निःसारोऽगन्ध एव च। पक्वः स एव विज्ञेयश्छेदवान् वक्त्रशुद्धिकृत्॥" (मधुकोशव्याख्या)

२ विपर्यये तु पक्वत्वं तथाऽऽताम्रं समेचकम्। पीतं च पित्तमच्छं च श्लेष्माऽच्छः पिण्डितोऽथवा। विशदश्च सफेनश्च धवलो मधुरो रसे॥ (अ.सं.सू. २१)

कालस्वभावदोषाणां संचय-प्रकोप-प्रशमाः

वायोः संचयकालः	वायोः प्रकोपकालः	वायोः प्रशमकालः
ग्रीष्मर्तुः	वर्षर्तुः	शरदृतुः
पित्तस्य संचयकालः	**पित्तस्य प्रकोपकालः**	**पित्तस्य प्रशमकालः**
वर्षर्तुः	शरदृतुः	शिशिरर्तुः
कफस्य संचयकालः	**कफस्य प्रकोपकालः**	**कफस्य प्रशमकालः**
शिशिरर्तुः	वसन्तर्तुः	वर्षर्तुः

(अ.सं.सू.२१)[1]

१ "आहारादिवशादकाले दोषाणां संचयप्रकोपप्रशमा भवन्ति। ते च पूर्वमुक्ताः। चयप्रकोपप्रशमा वायोर्ग्रीष्मादिषु त्रिषु। वर्षादिषु तु पित्तस्य श्लेष्मणः शिशिरादिषु॥ चीयते लघुरूक्षाभिरोषधीभिः समीरणः। तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति॥ अद्भिरम्लविपाकाभिरोषधीभिश्च तादृशम्। पित्तं याति चयं कोपं न तु कालस्य शैत्यतः॥ चीयते स्निग्धशीताभिरुदकौषधिभिः कफः। तुल्येऽपि काले देहे च स्कन्नत्वान्न प्रकुप्यति॥ इति कालस्वभावोऽयम्॥ आहारादिवशात्पुनः। चयादीन् यान्ति सद्योऽपि दोषाः कालेऽपि वा न तु॥"

(अ. सं. सू. २१)

वृद्धवाग्भटमतेन दोषाणां चयकोपशमानां लक्षणानि

चयलक्षणम्	कोपलक्षणम्	शमलक्षणम्
१ स्वस्थाने दोषाणां वृद्धिः	१ उन्मार्गगमनम्	१ स्वस्थानस्थस्य समता
२ वृद्धिहेतुषु प्रद्वेषः	२ स्वेषां लिङ्गानां दर्शनम्	२ विकारासम्भवः
३ विपरीतगुणेच्छा	३ अस्वास्थ्यम्	(अ.सं.सू.२०)१
	४ रोगसम्भवः	

१ "चयो वृद्धिः स्वधाम्न्येव प्रद्वेषो वृद्धिहेतुषु । विपरीत-गुणेच्छा च कोपस्तून्मार्गगामिता ॥ लिङ्गानां दर्शनं स्वेषामस्वास्थ्यं रोगसंभवः । स्वस्थानस्य च समता विकारासंभवः शमः ॥" (अ. सं. सू.२०) "स्वधाम्नि आत्मीये स्थाने दोषस्य या वृद्धिः संचयः । चीयमान-दोषवृद्धिहेतुषु प्रद्वेषः, तद्विपरीतगुणौषधादिष्विच्छा च चयलक्षणम् । कोपस्तु वृद्धेराधिक्याद्दोषस्य स्वस्थानात् स्थानान्तरगमनम् । अत्र चयकोपे स्वेषां कुपितदोषस्यात्मीयानां लिङ्गानां दर्शनं तथा अस्वस्थता, रोगसम्भवश्च । प्रशमस्तु दोषस्य स्वस्थानस्यैव साम्यं विकारासम्भवश्च । दोषस्य वृद्धिः चयः । सा च प्रथमं स्वधाम्न्येव भवति । यावन्नेवाशयः संचारवता दोषेण व्याप्तस्तावानेव निःसंचारेण व्याप्यते, स च संहतिरूपत्वात् संचयाख्यः । यदा सर्व एवाशयो व्याप्यते तदा वृद्धिहेतुषु समानगुणेषु प्रद्वेष उत्पद्यते, स प्रकोपप्रारंभरूपत्वात् प्रकोपाख्य । ततः परस्याशयं प्रविशति तदा विपरीतगुणेच्छा, चकारात् समानगुणेषु द्वेषश्च । स प्रसररूपत्वात् प्रसराख्यः । उन्मार्गगामिता स्वमार्गादन्येन मार्गेण गमनं, कोपः । तत्र यदा प्रथमं स्थानिनमभिभूय अन्यस्थानव्याप्तिः तदा स्वेषां रूपाणां रौक्ष्यादीनां दर्शनं, स रोगरूपेणाभि-व्यक्तत्वात् व्यक्ताख्यः । ततस्तमेव रोगमवस्थान्तराण्य-नुभवन् अनुबध्नाति तदा रोगसम्भवः दीर्घकालानुवर्त-नमिति यावत् । सोऽवस्थाभेदरूपत्वात् भेदाख्यः । एताश्च षडवस्थाः सुश्रुतेन स्पष्टमुक्ताः । संचयं च प्रकोपं च प्रसरं स्थानसंश्रयम् । व्यक्तिं भेदं च यो वेत्ति दोषाणां स भवेद्भिषक् ॥ (सु सू. २१) स्वस्थानस्थं समत्वमविकृतत्वं चेति मिलितं शमलक्षणम् । रसवर्णस्पर्शाद्यन्यत्वं विकारः (हेमाद्रिः) ।"

वातपित्तश्लेष्मक्षयाणां सामान्यलक्षणम्

१. वातपित्तकफानां प्राकृतलक्षणहानिः

२. वातपित्तश्लेष्मणां प्राकृतकर्महानिः

३. वातपित्तकफविपरीतकर्मणां वृद्धिः (च.सू.१७)१, (च. सू. १८)२

---

१ "दोषा जहति लिङ्गं स्वं" (च. सू. १७)

"यथाबलं यथास्वं च दोषाः×× । रूपाणि जहति क्षीणाः" (अ. सं. सू. १७)। 'क्षीणा दोषा यथाबलं क्षयबलतारतम्येण यथास्वं स्वानि स्वानि रूपाणि लिङ्गानि वायुः रौक्ष्यशैत्यादीनि पित्तमुष्णत्वादीनि, कफश्च गुरुत्वशीतत्वादीनि जहति त्यजन्ति।'

२ "कर्मणः प्राकृताद्धानिर्वृद्धिर्वाऽपि विरोधिनाम्। वाते पित्ते कफे चैतद्व क्षीणे लक्षणमुच्यते।" (च. सू. १८)

"कर्मणः प्राकृताद्धानिरिति वातस्य प्रकृतिस्थस्य प्राकृतं कर्म उत्साहादिकमुक्तं यत् तस्माद् हानिः अपचयः; अल्पोत्साहः, अल्पोच्छ्वासः, अल्पनिःश्वासः, अल्पचेष्टा, रसादीनामुत्तरोत्तरधातुपोषकत्वमल्पं, मलादीनामल्पो मोक्ष इति क्षीणवातस्य लक्षणम् अथवा प्राकृतादुत्साहादिकर्मणां विरोधिनामनुत्साहादीनां वृद्धिरिति तुल्यमेव क्षय-लक्षणमुभयथाऽपि भवतीति 'वा' शब्द उपात्तः। एवं पित्तस्य प्रकृतिस्थस्य यत् प्राकृतं कर्म दर्शनादिकमुक्तं तस्माद्धानिरपचयः, तस्माद्वा विरोधिनामदर्शनादीनां वृद्धिः पित्ते क्षीणे लक्षणम्। तथा पित्तक्षयेऽल्पदर्शनमदर्शनं वा, अल्पपक्तिरपक्तिर्वा अल्पोष्माऽनुष्मा वा, अल्पक्षुधाऽक्षुधा वा अल्पतृष्णाऽतृष्णा वा, देहमार्दवमल्पं न वा अल्पप्रभाऽप्रभा वा, मनसश्चाल्पप्रसादोऽप्रसादो वा, अल्पमेधाऽमेधा वेति। एवं कफस्य प्रकृतिस्थस्य यत् प्राकृतं कर्म स्नेहादिकमुक्तं तस्माद् हानिरपचयस्तत्कर्मणो विरोधिनां रौक्ष्यादीनां वृद्धिर्वा कफे क्षीणे लक्षणमुच्यते। तथा श्लेष्मक्षये देहस्याल्पास्निग्धत्वं रौक्ष्यं वा, शरीरसन्धीनामल्पं बन्धनमबन्धो वा, देहमांसाद्यवयवानामल्पशैथिल्यमशैथिल्यं वा, देहेल्पगुरुत्वं लघुत्वं वा, स्त्रीसंसर्गशक्तिरल्पा न वा अल्पबलमबलं वा, अल्पक्षमाऽक्षमा वा अल्पधृतिरधृतिर्वा, अल्पलोभोऽलोभो वा भवतीति (ग)'

सर्वेषां च व्याधीनां वातपित्तश्लेष्माण एव मूलं; तल्लिङ्गत्वाद् दृष्टफलत्वादागमाच्च। यथा हि कृत्स्नं विकारजातं विश्वरूपेणावस्थितं सत्त्वरजस्तमांसि न व्यतिरिच्यन्ते, एवमेव कृत्स्नं विकारजातं विश्वरूपेणावस्थितमव्यतिरिच्य वातपित्तश्लेष्माणो वर्तन्ते। दोषधातुमलसंसर्गादायतनविशेषान्निमित्ततश्चैषां विकल्पः।

सु. सू. २४।८.

शुद्धं स्वभावकर्मभ्यां वाताद्यैर्दुष्टमंशतः।
दृष्टं बीजार्थकृद्बीजं तत्र प्रकृतिरुत्तरम्

सु. शा. ४।६३
(डल्हणकृतनिबन्धसंग्रहटीकायाम्)

प्रकोपो वान्यथाभावो क्षयो वा नोपजायते।
प्रकृतीनां स्वभावेन जायते तु गतायुषः॥

सु. शा. ४।७८

समपित्तानिलकफाः केचिद्गर्भादि मानवाः।
दृश्यन्ते वातलाः केचित् पित्तलाः श्लेष्मलास्तथा॥

च. सू. ७।३९

दोषाः प्रवृद्धा लिङ्गं स्वं दर्शयन्ति यथाबलम्।
क्षीणा जहति लिङ्गं स्वं समाः स्वं कर्म कुर्वते।

च. सू. १७।६२

सर्व एव निजा विकारा नान्यत्र वातपित्तकफेभ्यो निर्वर्तन्ते, यथा हि—शकुनिः सर्वं दिवसमपि परिपतन् स्वां छायां नातिवर्तते, तथा स्वधातुवैषम्यनिमित्ताः सर्वे विकारा वातपित्तकफान्नातिवर्तन्ते। वातपित्तश्लेष्मणां पुनः स्थानसंस्थान-प्रकृतिविशेषानभिसमीक्ष्य तदात्मकानपि च सर्वविकारांस्तानेवोपदिशन्ति बुद्धिमन्तः॥

च. सू. १९।५

'श्री गुलाबकुंवरबा आयुर्वेद सोसायटी–जामनगर' इत्याख्यया
संस्थया प्रकाशितम्

श्री आयुर्वेद मुद्रणालये मुद्रापितम्